SANGAM LAL PANDEY

DYNAMICS OF INDIAN SOCIETY

VOL. I 64

देवर्षिकल्पम्

DARSHAN PEETH
ALLAHABAD

ब्राह्मणश्रमणन्यायो न लोके लक्षितश्चिरम् ।
वेदान्तविज्जगन्नाथो जातोऽतो बुद्धशिष्यकः ॥
तस्मै ददे सर्वेषां देशशान्त्यनुष्टयम् ।
ब्राह्मणश्रमणादर्शौ यतो मे प्रतिरक्षितौ ॥

[illegible]

२२।४७=१

Allahabad Philosophical Series No. 5

DYNAMICS OF INDIAN SOCIETY

Volume One : Original Text in Sanskrit

DEŚA ŚAKTI CATUṢṬAYAM

देशशक्तिचतुष्टयम्

By

SANGAM LAL PANDEY

M. A., D. Litt., Sahityacharya

Professor of Philosophy and Head of Philosophy Department

University of Allahabad

ALLAHABAD

Darshan Peeth

177, Tagore Town, Allahabad. (India)

1981

समर्पणम्

देशी देश्यो गुरुर्देशस्सर्वो येन समाहितः ।
स्वामिनं करपात्रं तं वन्दे लोकहिते रतम् ॥
तस्मै समर्प्यते भक्त्या देशशक्तिचतुष्टयम् ।
चित्रितं राष्ट्रियं यस्मिन् समाजगतिदर्शनम् ॥

Rs 25

Published by
Secretary, Darshan Peeth
177, Tagore Town, Allahabad.

Printed at Subhachintaka Press,
313 Daraganj, Allahabad.

विषयसुची

—

प्रस्तावना

मङ्गलं भगवान्वेदो मङ्गलं विधिशासनम् ।
मङ्गलं भगवांश्शिष्यो मङ्गलं शैक्षपद्धतिः ॥

मङ्गलं भगवान्बुद्धो मङ्गलं श्रुतदेशना ।
मङ्गलं भगवान्वीरो मङ्गलं श्रुतसाधना ॥

मङ्गलं भगवांस्तातो मङ्गलं पितृभावना ।
मङ्गलं भगवान्पुत्रो मङ्गलं त्यागजीवनम् ॥

मङ्गलं भगवान्दूतो मङ्गलं श्रुतनोदना ।
मङ्गलं भगवान्व्यासो मङ्गलं धर्ममन्थनम् ॥

मङ्गलं भगवान्रामो मङ्गलं धर्मविग्रहः ।
मङ्गलं भगवान्कृष्णो मङ्गलं धर्मरक्षणम् ॥

मङ्गलं भगवान्साधुर्मङ्गलं धर्मपालनम् ।
मङ्गलं भगवान्धर्मो मङ्गलं धर्मसङ्गमः ॥

मङ्गलं सच्चिदानन्दो मङ्गलं स्वात्मदर्शनम् ।
मङ्गलं लोकमर्यादा मङ्गलं लोकसंग्रहः ॥

ज्ञात्वा परम्पराप्राप्तं देशशक्तिचतुष्टयम् ।
करोति सङ्गमश्चेत्थं सर्वधर्मसमन्वयम् ॥

पुरस्कृत्य मतं तच्च समाजमानवावुभौ ।
वर्ण्यन्तेऽत्र धर्मनीती देशो भाषा च संस्कृतिः ॥

एकशक्तिर्द्विशक्तिर्वा त्रिशक्तिर्वा ततोऽधिकः ।
मनुष्यश्चित्रितो विज्ञैर्बहुग्रन्थेषु यत्नतः ॥

मामकीने मते किन्तु चतुश्शक्तिर्हि मानवः ।
तस्य शक्तौ विराजन्ते चतस्रः खलु शक्तयः ॥

तासां निरूपणे यत्नः क्रियतेऽत्र विधानतः ।
नव्यचिन्तामणौ ग्रन्थे देशशक्तिचतुष्टये ॥

चिन्तारचनयोरस्य दोषा ये च समीक्षिताः ।
विद्वांसस्तान्निराकृत्य विचारयन्तु मे मतम् ॥

इति सङ्गमलालपाण्डेयः ।

Introduction

This book is an essay on the rediscovery of India, an attempt to identify the forces that keep the Indian society ever moving upward in spite of all possible bottlenecks to its smooth functioning and cohesive development. The readers will find here many reasons to reject the various claims of the rediscovery of India that have been made by different authors in the twentieth century. Also, they will be stimulated to make their own rediscovery in case they do not agree to mine. Nonetheless, it is not a book of history. It is, on the other hand, a book of socio-political thought. So, it is more than a mere rediscovery of India, inasmuch as it tries to understand and step up the social change that is taking place in India today. The principles of this change are discussed here elaborately, and a theory of the fourfold focalization of social change has been presented. The foci that have been clearly identified and analysed are the country that has its own built-in forces of history and geography, the man that inhabits the country and inherits its rich culture, the language that is spoken by the people and preserves their undying traditions and the teacher that operates like a bridge between the past and the future. Each focus is a catalyst of social change, an instrument of societal continuity in the broad framework of social stabilization and solidarity.

Furthermore, the style of the book is radically different from the current style of such works in India. It is written *a la* the *Bhagawadgita*, the *Manusmṛti* and the *Bhaviṣyapurāṇa*. As in thought so in style it shares much with these classics,

although it is neither a gospel nor a recollection of the past nor a mythical work on futurism. As a matter of fact I have made an experiment upon new modes and counters of thought and tried to rejuvenate the classical Indian style and methodology of socio-political thinking that continued in some form until the introduction of English education replaced it by the western style of writings in the present century. I firmly believe that the original thought of India can be recaptured and recreated and developed further mainly in and through the use of the Sanskrit methodology of thought and writings. In consequence I have discovered that the *Śloka* style is one of the many styles that preserve the unity, continuity and creativity of Indian thought and that it is not only a mode of expression but also a mode of philosophizing, for it involves lots of serious thinking. In particular it uses the flashes of imagination and intuition and the processes of analogical induction and deductive refutation. The readers will find here many examples of such flashes and processes. The ancient methods of *na ca* (not this) and *iva* (as if) are as much recaptured as the method of syllogistic reasoning by using merely the *hetu* (reason). So the book is written *a la* the *Vakyapadiyam*, the *Nyāyakusumānjali* and the like. It tries to strike out new lines of thinking on socio-political problems of modern India. Even a casual reader will discover that I have expressed my views on a variety of problems. Some of them can be listed as follows:—

What is patriotism ? What is its role in society ?

How many forms of patriotism are possible ? How can internationalism be reconciled with nationalism ? What is the test of nationalism ? What is power ? What are its functions ? What is democracy ? What is socialism ? What is a political party ? What are its functions and limitations ? How can party government be reconciled with partyless government ? What is the power of language and especially the power of the national language ? Why is Hindi alone the national language of India ? How can Hindi progress further ? What are the immediate needs of the national language ? What is the place of Sanskrit in modern India ? How can Urdu progress further and what is its exact relationship with Hindi ? How can Hindi lead all other Indian languages towards their further development ? What are the useful economic policy and the educational policy for modern India ? How to aviod capitalism and communism and build up a new society in India ? How can secularism, Hindu-Muslim unity and the unity of all religions be established ? Who should be the ideal of men ? Why and how has the leader fallen from the sacred pedestal of a demi-god ? Who should take up the role of the leader in leading society to its goals of equality, liberty and fraternity ? How has corruption grown up ? What are its causes and cures ? What are the principles that retain the unity and diversity of Indian sub-continent ? How can they be further reinforced ? What is the most useful form of Government in India ? What is the role of law and morality in society ? What are the essentials of Indian Philosophy ?

Why and how has India preserved her different traditions of philosophy ? And a host of other problems. The readers will, undoubtedly, face these problems and get their solutions. I have not left any of these problems unsolved. But this does not mean that my solutions are the best ones. It is just possible that the readers may disagree with me. But it is not possible for them to ignore the clear understanding of these problems and the solutions that have been offered here.

Obviously I feel that the present work which is written in a cryptic or aphoristic style, requires a commentary for its full understanding. But I have not written a commentary upon it so far. The commentaries as such can be many and varied as they are the interpretations of those who have differing perceptions. Further if an author writes an auto-commentary upon his original work, his dual roles must be distinguished. The writer of the commentary is always different from the writer of the original work. Even if they be the same person, they represent the two distinct aspects of his personality. So I am satisfied here with the writing of my original draft and leave it to the readers to have their own comments upon it. To English knowing Sanskritists, however, I am giving apart from this Introduction a conspectus of contents that will help them understand the original Sanskrit *Ślokas*. To Sanskrit scholars, I have to say nothing by way of introduction to this book. The whole book is addressed to them and I hope and trust that it will speak to them and initiate a continuous dialogue which will be useful and relevant for the present milieu

of social change in India. To them I simply make the request to understand sympathetically the style and the thought of this book and write their comments on it for the furtherance of critical and constructive thinking and strengthening the people's power in any of its four forms described here.

लोकशक्तिं प्रतन्वन्तु कुर्वन्तु नवचिन्तनम् ।
सर्वे समीक्ष्य मे ग्रन्थं देशशक्तिचतुष्टयम् ॥

One point more and finish. Recently several notable efforts have been made to further the cause of Sanskrit education in India and several universities and the institutions of higher studies and research have been established to retain and continue the originality of Sanskrit way of thinking and communication. I hope my work will be regarded as an humble contribution to the sphere and the Sanskrit students and teachers of modern India will not only make a special study of it but also go several steps ahead in strengthening and consolidating its modes and materials. Language and thought are inalienably connected, especially Indian thought is so connected with Sanskrit.

वागनुसारिणी बुद्धिर्वाग्वा बुद्धयनुसारिणी ।
इत्यत्राद्यं मतं युक्तं सर्वं यतो हि वाङ्मयम् ॥
संस्कृतचिन्तनं मूलं मूलं संस्कृतलेखनम् ।
भारतभारतीमूलं शास्त्रमूलं च संस्कृतम् ॥
मूले हि रक्षिते वृक्षो रक्ष्यते सर्वदा यथा ।
संस्कृते रक्षिते चिन्ता रक्ष्यते नूतना तथा ॥
विश्वविद्यालयो यो हि संस्कृतार्थाय निर्मितः ।
नव्यां तनोतु चिन्तां स यथा मे ग्रन्थपद्धतिः ॥

Dated Allahabad, 14-3-1981 **S. L. Pandey**

Conspectus

I. *The Morphology of Power*

Introductory observations (1-2), Four forms of Power (3-9), The perennial power of Indian society, (10-14), The end of the chapter (15).

II. *The Morphology of Patriotism*

The uniqueness of the present work (1-6), Definitions of the patriotic love (7-12), Four forms of patriotic love (13-14), Patriotic love as Saguṇa Bhakti (15-16), Nationalism *versus* internationalism and their reconciliation (17-20), Nationalism *versus* regionalism (21-24), The patriotic scale of values (25-26), Devotion to mother tongue (27), The national obligation (28-30), The growth and development of patriotic love (31-34), The intrinsic value of patriotic love (35-38), Selfless patriots alone are the architects of good society and state (39), The end of the chapter (40).

III. *The Wonder that is India*

The ways of knowing the country (1-6), The pictures of the country (7-9), The definitions of Bhārata that is India(10-25), Meditation on the mother land (26-37), The fate of a traitor (38), Personal identity between the man and his country (39-47), inseparability of India and the Indian (48-58), The federal (central) government and other governments (59-62), State power and Man-power (63-65), Village planning and administration (66-68), Irrelevance of communism and capitalism to Indian situation (69-72), The relation between villages and cities (73-83), The defence of the motherland (84-86), The end of the chapter (87).

IV. *The Power of People's Language*

The people's language as the elixir of new life (1-3), Prakrit and Sanskrit and their relations (4-9), India as a land of many languages (10-11), The birth and development of Hindi (12-15), The importance of the national language (16-26), Hindi and Tamil (27-30), Propagation of Hindi abroad (31-32), Sanskrit and Hindi (33), Merits of Hindi as the national language of India (34-45), Hindi and Urdu (46-49), Devanagari script and its role (50-53), The present needs of Hindi (54-60), The national policy on language and philosophy (61-64), Education and Politics (65-69), The aim of education (70), Relation between Sanskrit and Hindi (71-77), The importance of Sanskrit and its place in Indian society (78-88), The end of the chapter (89).

V. *The People as the Author of Social Change*

Religion and community in India (1-15), Freedom and role of women in modern society (16-24), Indian social system as an open society (25-39), Two types of *varṇa* system (40-43), *Varṇa* system and castes (44), The criteria of greatness (45-48), Corruption in Government and its causes (49-54), Indian poverty and its problems (55-63), The principle of money supply (64-66), The wealth of the nation (67), The relation between the nation and its citizens (68-70), Economic equality and freedom (71-73), Nationalization and its scope (74-75), The instruments of social and economic equality (76-91), The national character of India (92-114), The conquest of non-violence over violence (115-124), The science of non-violence (125-

126), The three types of national character (127-137), The end of the chapter (138).

VI. *The Guru as the Nation-Builder*

Who is a Guru ? (1-12), The types of Gurus (13), The importance and the role of Guru (14-17), Democracy and its value(18-24), Corruption in election (25), The conditions of free aud fair election (26-27), The fate of a corrupt politician (28), The law-court as the remover of injustice in the poll, (29-30), Independence of judiciary (31), Defects of democracy (32-37), Partyless government and its feasibility (38-43), The administration of the political parties (44-49), Muslims of India (50-55), Religion and secularism (56-59), The unity of all religions (60-67), Good and bad Muslims (68-70), Hinduism and Islam and their meeting-point (71-76), The weakening of the Hindu-Muslim unity, its consequences and recovery (77-80) The unity of India and Pakistan (81-93), India as the abode of religious people (94-96), The merits and demerits of political parties (97-104), The philosophy of communist party(105-107), Socialism and its Indian form (108-114), The role of the leader and his party (115-117), The control of teachers over politicians (118-131), Law and morality (132-140), The value of renunciation (141-143), The value of truth (144-146), Truth and renunciation (147-152), The end of the chapter (153).

VII. *Concerning Statism and Humanism*

The essentials of Hegelianism (1-3), The essentials of Marxism (4-15), Refutation of Marxism (16-19), Gandhism *versus* Marxism (20-24), Further Criticism of Marxism (25-28), The essentials of Gandhism (29-36), State *versus* the People (37-40), People's Democracy (41-43), Political leader and the People's leader (44-47), The essentials of humanism (48-50), The end of the chapter (51).

देशशक्तिचतुष्टयम्

१

प्रथमः शक्तिपरिच्छेदः

देश्यदेशाविवासक्तौ देश्यदेशविवृत्तये ।
संस्कृतेः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥१॥

वाणीविनायकौ वन्दे भाषादेशिकरूपिणौ ।
याभ्यां विना न पश्यन्ति नरा राष्ट्रमिवेश्वरम् ॥२॥

देशश्च देशिको देशी देश्यस्तनु चतुष्टयम् ।
एकैव देशशक्तिः सा चतुर्धा कथ्यते बुधैः ॥३॥

ब्राह्मी शक्तिर्गुरोः शक्तिर्भाषाशक्तिश्च वैष्णवी ।
देश्यशक्ति मंता रौद्री देशशक्तिश्च दैविकी ॥४॥

देश्यशक्तिस्तथा मूलं शिवशक्ति र्यथा मता ।
अन्याश्च शक्तयः सर्वा देश्यशक्तिसमुद्भवाः ॥५॥

यथा देश्यस्य चारित्रे देशशक्ति र्विराजते ।
तथैव तस्य चारित्रे भाषादेशिकभूमिका ॥६॥

यथा गुरु र्यथा भाषा यथा देशः सनातनः ।
तथैव जायते देश्यः सर्वपुण्यप्रतापजः ॥७॥

तस्य शक्ति दंरीदृष्टा देशशक्तिचतुष्टयी ।
देशशक्तिपराकाष्ठा निखिलशक्तिसम्पदा ॥८॥

उद्भवस्थितिभङ्गेषु सर्वेषामेव कारणम् ।
शक्तिरेव मता विज्ञै विना शक्तिं न सत्क्वचित् ॥९॥

शक्तिर्या भारते दृष्टा विद्यते न हि सा क्वचित् ।
नित्यनूतनतां धत्ते यतः प्राचीनभारतम् ॥१०॥

सर्वे देशा विनष्टास्ते ये पुरा सुप्रतिष्ठिताः ।
अद्यापि भारतं किन्तु पूर्ववद्धि प्रतिष्ठते ॥११॥

कोऽपि शक्तिविशेषोऽयं भारतसत्त्वकारकः ।
शक्तिं तामविदित्वा को भारतं ज्ञातुमर्हति ॥१२॥

भारतभाग्यविधात्री सर्वोत्कर्षविधायिनी ।
मृत्युञ्जया शुभा शक्तिः कथ्यते सैव साम्प्रतम् ॥१३॥

क्रियतेऽत्र प्रयत्नेन तस्या एव निरूपणम् ।
मङ्गलं भारतं वर्षं तस्य शक्तिश्च मङ्गलम् ॥१४॥

इति श्रीसङ्गमाचार्ये देशशक्तिचतुष्टये ।
परिच्छेदः प्रणीतोऽयं प्रथमः शक्तिसंज्ञकः ॥१५॥

२

द्वितीयो भक्तिपरिच्छेदः

पुराणेषु च वेदेषु हरिःसर्वत्र गीयते ।
रामायणकथायाञ्च व्यासप्रणीतभारते ॥१॥

भक्तिर्भागवते गीता नानाधर्मसुशोभिता ।
यो भक्तः स हरिश्चेति भक्तमालेऽपि वर्णितम् ॥२॥

गुरौ भक्तिः पुरा गीता हरिभक्तैश्च साधुभिः ।
क्वापि सुष्ठु न गीताऽसौ देशभक्तिर्विधानतः ॥३॥

सङ्गमस्तां तनोतीह श्रद्धाविश्वासपूर्वकम् ।
भक्ते हरौ गुरौ चैव देशे भक्तिर्दृढा मता ॥४॥

असंख्या देशभक्ता ये संजाता वर्षभारते ।
तेषामेव कथा ज्ञेया देशभक्तिनिदर्शने ॥५॥

देशभक्तिविकाशाय देशभक्तिचतुष्टयम् ।
देशभक्तिस्वरूपं वै वर्ण्यतेऽत्र सलक्षणम् ॥६॥

देशभक्तिःस्वदेशीति प्रोक्तं गांधिमहात्मना ।
ग्रामभक्तिरिति प्राहुरपरे ग्रामदेवताः ॥७॥

मातृभूमिकृते भक्तिरित्यन्ये बङ्किमादयः ।
पितृभूमिकृते त्वेति श्रीसावरकरादयः ॥८॥

भारतेन्दुमहाभागः केवलं भारतीकृते।
मैथिलीशरणो गुप्तस्तथा च भारतींप्रति ॥९॥

भारतीयेषु भक्तिञ्च तामाह नेहरूसुधीः।
केचिद् वदन्ति तेषां च पारस्परिकभावनाम् ॥१०॥

इतिहासक्रमं तेषामथेतिहासवादिनः।
समन्वितं मतं सर्वं चापरे देशपण्डिताः ॥११॥

एकरूपं हि सर्वत्र देशभक्तिचतुष्टये।
देशभक्तिरिति प्रोक्ता देशभक्तिविचारकैः ॥१२॥

देशीभक्तिः स्वभाषायां देशभक्तिः स्वदेशके।
देश्यभक्तिः स्वदेशीये गुरौ भक्तिश्च देशिके ॥१३॥

देशभक्तिरभिन्नापि चतुर्धेत्थं मता बुधैः।
विदेशभक्तितो भिन्ना नूनं कार्या हि सा सदा ॥१४॥

देशभूमिं च देश्यं च स्वेतिहासं च भारतीम्।
सगुणोपासकः सर्वं पूजयति विशेषतः ॥१५॥

मातृभूमिर्यथा स्थूला देशभक्तिस्तथैव च।
नागुणा भारतभूमि र्देशभक्तिर्न निर्गुणा ॥१६॥

विदेशभक्तितो बाधा देशभक्तौ विवर्तते।
नास्ति द्वन्द्वस्तयोः कश्चिदित्यपि कोऽपि भाषते ॥१७॥

अस्ति द्वन्द्वस्तयोर्नूनं यदीह राष्ट्रशासनम्।
नास्ति द्वन्द्वस्तयोर्यत्र वसुधैव कुटुम्बकम् ॥१८॥

देशभक्तिजगद्भक्ती संगच्छेते स्वसङ्गमे।
जगद्भक्तिर्हि कालिन्दी देशभक्तिश्च जाह्नवी ॥१९॥

प्रथमैवापरां याति प्रथमां नैव चापरा ।
इति सम्यग्विजानीयाद्देशविदेशसङ्क्रमम् ॥२०॥

जगद्भक्तिरतिव्याप्ता देशभक्तिं विनाक्षमा ।
निर्गुणा च निराकारा सूक्ष्मा सामान्यकल्पना ॥२१॥

जगद्भक्तिर्यथैकान्तः क्षेत्रभक्तिस्तथैव च ।
तयोरेव विरोधोऽस्ति देशभक्तिस्तु मध्यगा ॥२२॥

क्षेत्रभक्तिश्च सङ्कीर्णा देशभक्तिविनाशिका ।
अव्याप्ता न च पर्याप्ता मोहद्वेषैश्च संयुता ॥२३॥

उभयं वर्जयित्वा यो निजराष्ट्रमुपास्वे ।
स एव देशभक्तो हि निखिलैः कीर्तितो बुधैः ॥२४॥

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
नीवृतोऽर्थे त्यजेद् ग्रामं देशस्यार्थे च नीवृतः ॥२५॥

न च देशं न तद्भक्तिं कस्याप्यर्थे क्वचित्त्यजेत् ।
यथा देवे परा भक्तिस्तथा देशेऽपि सम्मता ॥ २६ ॥

यथा देवे तथा देश्यां प्रजायते मतिर्यदा ।
भाषाभक्तिस्तदा जाता राष्ट्रभक्तिपराङ्गता ॥२७॥

देशे बुद्धिर्गुरौ बुद्धिर्देश्ये बुद्धिश्च तादृशी ।
राष्ट्रभाषागता बुद्धिर्देवे बुद्धिश्च यादृशी ॥२८॥

बुद्धिरेषा मनुष्याणां देशभक्तिजनिर्मता ॥
देशादीनधिकृत्य सा सहजा पूज्यभावना ॥२९॥

सर्वं करोति कर्तव्यमनया प्रेरितो नरः ।
देशभक्तिचतुष्टयं स्वार्थपरार्थसाधकम् ॥३०॥

दिव्याया भावनायाश्च जायते कर्मभावना ।
स्वकर्मभावनायाश्च सर्वकर्त्तव्यपालनम् ॥३१॥

विना कर्म विना त्यागं विना ज्ञानं च भावनाम् ।
विनापि च प्रतीकारं देशभक्तिर्न सम्भवा ॥३२॥

आदौ श्रद्धा ततोभावस्ततो ज्ञानं क्रियापरम् ।
ततः परिग्रहाभावस्ततस्त्यागश्च कीर्तितः ॥३३॥

गान्धिप्रभृतिनेतारो देशभक्तिपराक्रमाः ।
वदन्तीत्थं क्रमं भक्तेः सर्वलोकसुखप्रदम् ॥३४॥

देशभक्तो यदा भक्तिं विक्रीय भोगमश्नुते ।
योगभ्रष्ट इवाचारं लोके स कुरुते तदा ॥३५॥

देशभक्तिः सदा साध्या न पुनःसाधनात्मिका ।
इत्येषा कथ्यते भक्तैर्हरिभक्ते विलक्षणा ॥३६॥

भक्तिः सायुज्यरूपा या शास्त्रेषु बहुवर्णिता ।
राष्ट्रदेवस्य सायुज्ये देशभक्तिर्मता हि सा ॥३७॥

सर्वसमर्पणं राष्ट्रे राष्ट्रस्यार्थे च जीवनम् ।
देशभक्तस्य देहोऽयं राष्ट्रकामाय वर्तते ॥३८॥

स्वाराज्यं रामराज्यं वा देशभक्तैर्विधीयते ।
न च शक्तिपदोन्मत्तैर्न वा कामार्थसाधकैः ॥३९॥

इति श्रीसङ्गमाचार्यैर्देशशक्तिचतुष्टये ।
परिच्छेदः प्रणीतोऽयं द्वितीयो भक्तिसंज्ञकः ॥४०॥

३

तृतीयो देशपरिच्छेदः

प्रत्यक्षेणानुमानेन स्वानुभूत्या च शास्त्रतः ।
देशो जिज्ञासुभिर्ज्ञेयः परम्पराक्रमात्पुनः ॥१॥

प्रत्यक्षेण मतिर्जाता शास्त्रैश्च वर्धते पुनः ।
स्वानुभूत्यानुमानेन पुष्टिं याति च रूढितः ॥२॥

शास्त्रं विना सविज्ञानं स्वानुभूतिं विना पुनः ।
न कोऽपि लभते ज्ञानं स्वदेशस्य सुनिश्चितम् ॥३॥

प्रमाणपञ्चकं प्रोक्तं स्वदेशज्ञानहेतवे ।
स्वानुभूतिश्च तन्मध्ये श्रेष्ठप्रमाणतां गता ॥४॥

भूगोलश्चेतिहासश्च भूगर्भज्ञानसम्पदा ।
नानाशास्त्रपुराणानि देशज्ञाने च हेतवः ॥५॥

प्रत्यगात्मा यथा सर्वैः साक्षादेवानुभूयते ।
सम्यक् तथैव देशात्मा देशभक्तैः प्रतीयते ॥६॥

देशस्य मानचित्रं यद् भौगोलिकैर्विरच्यते ।
तच्छायेव मनुष्यस्य देशाकारस्य चित्रणम् ॥७॥

मानचित्रमिव ज्ञेयं काव्यचित्रंसनातनम् ।
काव्येषु चित्रितो देशो भौगोलिकैर्न हीयते ॥८॥

वस्तुचित्रमिव ज्ञेयं वृत्तं यदैतिहासिकम् ।
पुरातत्त्वं विना चित्रं नैव देशस्य पूर्यते ॥९॥

देशस्य लक्षणं नाना कृतं प्रमाणपूर्वकम् ।
यथामति यथाकालं सर्वथा च यथागुणम् ॥१०॥

उत्तरं यत्समुद्रस्य हिमाद्रेश्चापि दक्षिणम् ।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ॥११॥

चातुर्वर्ण्यव्यवस्थानं यस्मिन्देशे न विद्यते ।
तं म्लेच्छविषयं प्राहुरार्यावर्त्तमतः परम् ॥१२॥

कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परम् ॥१३॥

इत्येवं भारतीयैश्च स्वदेशः सुष्ठु लक्षितः ।
विदेशीयैरपि प्रोक्तं पुनर्भारतलक्षणम् ॥१४॥

हिन्दुस्थानं च तन्नाम पारसीकैः कृतं पुरा ।
इण्डियेत्यभिधानं च गुरुण्डैर्यवनैः कृतम् ॥१५॥

हिन्दुरिति मता सिन्धुरिण्डसेति च वै पुनः ।
तस्याः परश्च यो देशो हिन्दुस्थानं स कीर्तितः ॥१६॥

इण्डिया नाम तस्यैव निश्चितमाङ्ग्लभाषिभिः ।
ततश्च सुन्दरं भाति भारतं नाम संस्कृतम् ॥१७॥

व्युत्पत्तिर्हिन्दुशब्दस्य प्रदर्शितैव चान्यथा ।
कैश्चिच्छब्दप्रवृत्तिज्ञैर्देशभक्तैश्च पण्डितैः ॥१८॥

आसिन्धुसिन्धुपर्यन्ता यस्य भारतभूमिका ।
पितृभूश्च पुण्यभूश्चैव स हिन्दुरिति स्मृतः ॥१९॥

हिंसया दूयते यश्च सदाचारेण तत्परः ।
वेदगोप्रतिमासेवी स हिन्दुमुखवर्णभाक् ॥२०॥

श्रीसावरकरेणाद्यं वृद्धस्मृतिकृता परम् ।
प्रसिद्धं लक्षणं हिन्दोर्भारतोत्कर्षकारकम् ॥२१॥

निरुक्तालोचनेऽप्युक्तं प्रमुखं हिन्दुलक्षणम् ।
यो हीनं दूषयत्येव स वै हिन्दुरिति स्मृतः ॥२२॥

सर्वं लक्षणमेतद्धि भावनावृत्तिसंयुतम् ।
यादृशी भावना यस्य तादृशं हिन्दुलक्षणम् ॥२३॥

तार्किकं लक्षणं चान्यद् भूगोलैतिह्यनिश्चितम् ।

देशनाम यदा हिन्दुर्देश्यनाम ततः परम् ॥२४॥
हिन्दुस्थानं यदा नाम भारतस्य प्रतिष्ठितम् ।
भारतीयप्रजानाम तदा हिन्दुरिति स्मृतम् ॥२५॥

देशचित्रं सदा ध्येयं देशभक्तिकारकम् ।
भावचित्रं जनाकीर्णं कृत्वा तस्मिंश्च सुन्दरम् ॥२६॥

देशध्यानाद् विदेशेषु तेभ्यश्च प्रथमागते ।
देशसंस्पर्शमात्रेण जायते कापि भावना ॥२७॥

तामीश्वरानुभूतिं योग्यरविन्दादयो विदुः ।
देशभक्तिसमो मार्गो न दृष्टो ब्रह्मसाधकैः ॥२८॥

देशस्य पर्वतं तीर्थं नदीं वनं वनस्पतिम् ।
पुरीं च सागरं दृष्ट्वा न केन दृष्ट ईश्वरः ॥२९॥

क्व हिमाद्रिसमः शैलः क्व च गङ्गासमा नदी ।
रामेश्वरसमः सेतुः क्व च विन्ध्यसमं वनम् ॥३०॥

यज्ञः कुत्र न सम्पन्नो दानपुण्येन संयुतः ।
तपः कुत्र न तप्तं तत्पावनं यन्मनीषिणाम् ॥३१॥

सर्व एव प्रदेशो हि भगवल्लीलयाङ्कितः ।
रामकृष्णशिवा देवाः क्व नागताः क्व नादृताः ॥३२॥

प्रकटब्रह्मलोकोऽयं देशः सर्वत्र वर्णितः ।
लब्धा सालोक्यमुक्तिश्च भारतीयैः स्वजन्मना ॥३३॥

नेश्वरः कुत्र संदृष्टः स नानापथगामिभिः ।
कुत्र मूर्तिर्न देवस्य न च कुत्र शिवालयः ॥३४॥

कुत्र न शोणितं दत्तं सुवीरैर्देशरक्षकैः ।
प्राप्ता वीरगति दिव्या क्व न संग्रामजीवितैः ॥३५॥

स्मारं स्मारं प्रभोर्लीलां देशधूलिकणाङ्किताम् ।
नहि को लभते मुक्तिं परां सायुज्यसंज्ञकाम् ॥३६॥

संप्राप्य यादृशं देशं यो न भवति भक्तिमान् ।
तस्य ज्ञानविहीनस्य कृतेन किं सुखेन किम् ॥३७॥

देशाय द्रुह्यते यो वा किञ्चित्तमपकर्षते ।
स नरः सकुलं शीघ्रमात्मानं हन्त्यसंशयम् ॥३८॥

जन्मभूमिप्रति भक्तिः सर्वलोकै विधीयते ।
श्रीरामतीर्थवन्मत्वा स्वदेहमेवभारतम् ॥३९॥

यादृशो भारताकारो मुखं देश्यस्य तादृशम् ।
भारतीयमुखे शेते दिव्या सा भारतीयता ॥४०॥

संपश्यति यदा वक्त्रं पुरुषः शुभ्रदर्पणे ।
भारतस्य तदाकारं तस्मिन्नेव स पश्यति ॥४१॥

न पश्यति स्ववक्त्रं हि नरः कोऽपि परानने ।
किन्तु भारताकारं तस्मिन्नपि स पश्यति ॥४२॥

अभिजानाति यःस्वान्तो मानसं रूपदर्शनम् ।
संप्राप्नोति स तत्रैव दिव्यं भारतदर्शनम् ॥४३॥

अभिजानाति कःस्वान्तो नरः परात्मदर्शनम् ।
प्राप्नोति किन्तु तत्रापि नरो भारतदर्शनम् ॥४४॥

यथा ज्ञानं तथा देशःस्वपरात्मप्रकाशकः ।
वाक्यं तत्त्वमसीतिवत् तादात्म्यं देशदेश्ययोः ॥४५॥

स्वात्मानं लभते यो हि ज्ञानवैराग्यवान् यदा ।
भारतस्यैव शुद्धात्मा तदात्मा तस्य विद्यते ॥४६॥

तादृशो भारतीयोऽस्ति यादृशा भाति भारती ।
भारतान्मनसाप्यसौ पलायितुं न सक्षमः ॥४७॥

प्रयाति यत्र यत्रासौ ध्यायते पुण्यभारतम् ।
विस्मृत्याप्यन्यसम्वन्धं नैव विस्मरतीह तम् ॥४८॥

एषा ग्रन्थिश्च देशस्य न शस्त्रेणापि छिद्यते ।
सा छिद्यते यथा यथा तथा तथा च वर्धते ॥४९॥

भिद्यते लेशमात्रं सा न शास्त्रेणापि केनचित् ।
सा भिद्यते यथा यथा तथा तथा च वर्धते ॥५०॥

देहपातेऽपि संलग्ना संगच्छते सहात्मना ।
न च भेदयितुं शक्या प्रलयङ्करमृत्युना ॥५१॥

त्यक्तुं क्षमो न यो देशं भारतीयः स जन्मना ।
क्षमा धर्मार्थकामा न विनष्टुं भारतीयताम् ॥५२॥

भारते बहुधर्मा ये भाषाश्चापि समुन्नताः ।
समर्था न विनष्टुं ते शाश्वतीं भारतीयताम् ॥५३॥

भिन्ना यद्यपि सञ्जाता भागाः क्वचित्कदाचन ।
कालक्रमप्रभावाद्वा विदेशनीतिचक्रतः ॥५४॥

लग्ना तथापि भिन्नेषु याभिन्ना भारतीयता ।
नार्हन्ति भेदयितुं तां कालसन्निभशत्रवः ॥५५॥

बहुक्षेत्रं यथा गङ्गा भिनत्ति च युनक्ति च ।
तथैव भारतं प्रान्तान् भिन्नाभिन्नान् करोत्यपि ॥५६॥

या भिन्नता प्रदेशेषु सा प्रकृत्या प्रजायते ।
गङ्गाया इव भूखण्डाः कृषिगोचरहेतवे ॥५७॥

सर्वप्रदेशसंलग्ना यत्रास्ति भारतीयता ।
प्रोज्झितुं कःसमर्थस्तां कणे जने च चिह्नताम् ॥५८॥

विधेयं शासनस्यैक्यं भारतैक्यविधायकैः ।
सङ्घशासनजं तच्च भिन्नप्रवृत्तिरक्षणम् ॥५९॥

भेदाभेदो यथा देशो न तथा तस्य शासनम् ।
प्रान्तकेन्द्राभिसम्बन्धो भेदाभेदो मतो यतः ॥६०॥

केन्द्रे स्यात्समतावादि प्रान्तरक्ष्यं च राजकम् ।
प्रान्तेषु केन्द्ररक्ष्यं च प्रजातन्त्रप्रशासनम् ॥६१॥

ग्रामे ग्रामे प्रजातन्त्रं तदैव संभविष्यति ।
रामराज्यं प्रजातन्त्रं यदा समधिगच्छति ॥६२॥

ग्रामे ग्रामे सभा कार्या तत्रापि लोकचिन्तनम् ।
चिन्तनादथकल्याणं कार्यं ग्रामनिवासिनाम् ॥६३॥

यच्छिवं सुन्दरं सत्यं तत्सर्वं शक्तिजं मतम् ।
शक्तिश्च राज्यसत्तास्ति लोककल्याणकारिणी ॥६४॥

लोकशक्तिः पराशक्तिर्लोकसङ्ग्रहजा मता
जायते मतदाने सा द्वन्द्वो यत्र प्रतिष्ठितः ॥६५॥

प्रजाहिते रतास्सर्वे विद्वांसो ग्रामवासिनः ।
राज्ये सर्वत्र संयोज्या ग्रामप्रगतिहेतवे ॥६६॥

स्यात्प्रशासके नित्यं ग्रामीणजनबन्धुता ।
ग्रामोद्योगप्रसारार्थं ग्रामस्वातन्त्र्यवासना ॥६७॥

ग्रामराज्यं मतं मूलं राज्यसंस्थानकस्य हि ।
उन्नतानि च सर्वाणि तस्मिन्सति समुन्नते ॥६८॥

भारते दीर्घदर्शने साम्यवादो न युज्यते ।
विदुषामिव संसदि लोलप्रवृत्तिबालकः ॥६९॥

भारते निर्धने देशे पूञ्जीवादो न युज्यते ।
हारइव हिरण्यस्य क्षुत्क्षाममहिलागले ॥७०॥

साम्यवादोऽफलो जातः कृषेर्यत्र प्रधानता ।
पूञ्जीवादोऽफलो जातो जनता यत्र शोषिता ॥७१॥

उभौ संत्यज्य तस्मात्तौ भारतवासिभिर्मता ।
प्रजातन्त्रेण संयुक्ता समाजवादपद्धतिः ॥७२॥

पौरं जानपदं चैते शासने द्वे पृथक्कृते ।
प्राप्यं सदा तयोरैक्यं यथासम्भवमार्थिकम् ॥७३॥

रक्ष्यो जानपदो धर्मः पौरधर्मस्य संकरात् ।
पौरजानपदं धर्मं यो जानाति स देशिकः ॥७४॥

संस्कृतिर्वसति ग्रामे पुरे वसति सभ्यता ।
आद्ये च भूमिजं वित्तं चरमे चास्तिबुद्धिजम् ॥७५॥

सन्ति ग्रामेषु सौहार्दं समता चापि बन्धुता ।
प्रकृतिप्रेमजावृत्तिः स्वतन्त्रता च भूयसी ॥७६॥

एते धर्माः सदा रक्ष्या लोकसंस्कृतिरक्षकैः ।
ग्रामवर्त्तिर्हि सन्मूलं राष्ट्रस्य महतो यतः ॥७७॥

पत्तनेषु महोद्योगः पुरव्यवस्थितापणम् ।
नानाविज्ञानशोधार्थं विद्याकेन्द्रं च स॰मम् ॥७८॥

इमास्संस्थास्सदा रक्ष्यास्सभ्यतोत्कर्षकारकैः ।
उन्नतेः पत्तनं मूलं राष्ट्रस्य सुमतं यतः ॥७९॥

अस्ति ग्रामस्य वैशिष्ट्यं सत्पारम्पर्यरक्षणे ।
पत्तनस्य पुनर्दृष्टं नव्यविषयशोधने ॥८०॥

नासौ ग्रामविकासो वै ग्रामश्चेन्नगरायते ।
पत्तनस्य विकासो नो ग्रामवद्यदि पत्तनम् ॥८१॥

पतत्त्रे पत्तनं ग्रामो हेमखेचरभारते ।
नभोगतिर्न शक्नोति तयोरेकेन कदाचन ॥८२॥

पौरजानपदं राष्ट्रं संयोज्यं राष्ट्रशासकैः ।
स्वसंस्कृतिस॰मुन्नेया यत्नैरपि च सभ्यता ॥८३॥

सामुद्री पार्वती किंवा सतृणा निस्तृणाथवा ।
रक्ष्या सीमा स्वदेशस्य सजना निर्जनाथवा ॥८४॥

देशं पातु प्रशस्तास्त्रं सुसैन्यं चातिनूतनम् ।
विज्ञानस्य प्रचारास्स्युस्सम्पन्नाश्चाति वासिनः ॥८५॥

सम्पन्ना जनता यत्र नानाविज्ञानसंयुता ।
बाह्याभ्यन्तरशत्रुभ्यो देशो मतः स रक्षितः ॥८६॥

इति श्रीसङ्गमाचार्यैर्देशशक्तिचतुष्टये ।
परिच्छेदः प्रणीतोऽयं तृतीयो देशसंज्ञकः ॥८७॥

———

चतुर्थो भाष.परिच्छेदः

देशी रसायनं भाषा संप्राप्तजनताधरम् ।
संजातपतने राष्ट्रे सञ्जीवनीलता मता ॥१॥

परित्यक्तापि विद्वद्भिर्न नश्यति कदाचन ।
न च त्यजति तांश्चापि साहाय्यसुलभा सदा ॥२॥

जनसम्पर्कसंन्यासं नैव जानाति कञ्चन ।
जनतामुन्नयते क्षिप्रं भावप्रकाशदुःखिताम् ॥३॥

जननी शिष्टभाषानां देशी प्रख्यातप्राकृतम् ।
लुप्तायां शिष्टभाषायां स्वात्मानं तनुते हि सा ॥४॥

संस्कृतप्राकृते भाषे सम्मते कार्यकारणे ॥
प्राकृते दृश्यते शक्तिर्नवभाषाविकाशिनी ॥५॥

देशी सर्वङ्कषा भाषा नैसर्गिकी च प्राञ्जला ।
संस्कृते विफले जाते सैव पुष्णाति संस्कृतिम् ॥६॥

रामायणं यथाज्ञेयं संस्कृतस्य यदाभवत् ।
हिन्दीरामायणं पाति तदा भारतसंस्कृतिम् ॥७॥

काठिन्यात्प्रति साफल्यं या भाषाया गतिर्मता ।
तस्याः कारणं ज्ञेयं देशीभाषैव केवलम् ॥८॥

देशी गङ्गाजलं नित्यं सुखं वहति प्राञ्जलम् ।
न तत्र क्षीणता कापि स्थिरता वा कदाचन ॥९॥

प्रयुक्तबहुभाषोऽयं देशो विशालभारतम् ।
कोटिजिह्वागता वाणी तस्यातिरामणीयकी ॥१०॥

नाना देश्यश्च यास्तत्र प्रान्तभाषासु तास्स्थिराः ।
प्रान्तभाषाः पुनर्याताः परस्परं च सङ्गमम् ॥११॥

तासां च सङ्गमो हिन्दी हिन्दरूपा बृहत्तमा ।
संस्कृतप्राकृतापत्यं राष्ट्रभाषाधुनागता ॥१२॥

पारसी राज्यभाषासीद्यदा मुगलशासने ।
हिन्दी तडित्तदा भित्त्वा तद्घनमिवनिर्गता ॥१३।

अंग्रेजी राज्यभाषा च यदासीदाङ्ग्लशासने ।
क्षिप्र प्रक्षिप्य तां हिन्दी नष्टवत्याङ्ग्लशासनम् ॥१४॥

सङ्घर्षेण समुत्पन्नां विदेशभाषया सह ।
तेनैव वर्धितां हिन्दीं राष्ट्रभाषां न वेत्ति कः ॥१५॥

हिन्दी गङ्गापयोनिधिर्नानाभाषास्सरित्समाः ।
भिन्नधारास्तरङ्गिण्यस्तासामेकञ्चजीवनम् ॥१६॥

राष्ट्रभाषां विना राष्ट्रं जलं विना झषो यथा ।
न जीवितुं च शक्नोति तां विना परमार्थतः ॥१७॥

राज्यभाषा भवेद्धिन्दी भारते संघशासने ।
एषा भावना राष्ट्रस्य न पूरिता न चादृता ॥१८॥

यद्यपि प्रेमिभिस्तस्यास्संविधाने कृतो विधिः ।
चरितार्थो न चाद्यापि स विधिस्संविधानतः ॥१९॥

मस्तकं पीडयित्वातो राष्ट्रभाषेह रोदिति ।
दमयन्तीव सर्वत्रानुसन्धत्ते पतिं वरम् ॥२०॥

राज्यभाषा यतो हिन्दी नहि भवति भारते ।
अर्धस्वतन्त्रता प्राप्ता दैहिकी न च वाचिकी ॥२१॥

सर्वस्वतन्त्रता हीना भाषास्वतन्त्रतां विना ।
राष्ट्रभाषां विना राष्ट्रं विना वाणीं यथा नरः ॥२२॥

कस्याश्चिद्देशभाषाया नास्ति हिन्दी विरोधिनी ।
तासां मध्ये च संघर्षो न भूतो न भविष्यति ॥२३॥

सञ्जाता सर्वभाषाणां हिन्दी सङ्गमनी पुरा ।
वाक्यविन्यासरूपञ्च तस्यास्सर्वगुणाकरम् ॥२४॥

सुखं जन्म सुखं कर्म सुखं वयस्सुखं लिपिः ।
सुखं वाक्यं च यस्या हि सा हिन्दी सुखसागरः ॥२५॥

उत्तरा दक्षिणा दिग्वा पूर्वा वा पश्चिमाऽथवा ।
सर्वतो भारतभूमौ हिन्दी कुत्र न बुध्यते ॥२६॥

आर्यभाषाकुला हिन्दी व्याकुला तमिलं विना ।
देशे वर्षेव भ्राम्यन्ती भाषा तमिलनूपुरा ॥२७॥

आर्यद्राविडसंघर्षो नानया संभविष्यति ।
भक्तिर्द्राविडजा तस्या यतो हि संबलं सदा ॥२८॥

न द्राविडो न चार्यो वै कश्चित्सम्प्रति वर्तते ।
सञ्जातो भारते देशे ह्यार्यद्राविडसंकरः ॥२९॥

आर्यद्राविडसंघर्षः कल्पितो हि खपुष्पवत् ।
पाश्चात्यपण्डितैर्मिथ्या विभक्तुं देशभारतम् ॥३०॥

विदेशेषु यदा हिन्दीप्रचारस्संभविष्यति ।
तदा तस्या विरोधोऽयं देशे शान्तिं गमिष्यति ॥३१॥

२

राष्ट्रभाषाप्रचारोऽतः कार्यस्सर्वत्र पावनः ।
सर्वाभिर्विश्वभाषाभिर्हिन्दी पोष्या सतर्कतः ॥३२॥

विख्यातं संस्कृतं कूपं हिन्दी तरङ्गिणी मता ।
अन्या भाषाश्च यास्सन्ति ता धारा विविधा मताः॥३३॥

बहुशब्दा बहुध्वनिर्बहुतुष्टिर्बहुक्षमा ।
बहुप्रिया बहुप्रजा हिन्दी कस्मै न रोचते ॥३४॥

बहुगाथा बहुश्लोका बहुवर्णा बहुस्वना ।
बहुशैली बहुच्छन्दा हिन्दी कस्मै न रोचते ॥३५॥

बहुभक्तिर्बहुज्ञप्तिर्बहुरीतिर्बहुश्रुतिः ।
बहुभेदा बहुक्षेत्रा हिन्दी कस्मै न रोचते ॥३६॥

बहुकष्टा बहुक्लेशा बहुपीडा, बहुव्यथा ।
बहुदुःखा बहुव्याधिर्हिन्दी कस्मै न रोचते ॥३७॥

बहुमूल्या बहुप्रज्ञा बहुप्रदा बहुप्रजा ।
बहुशक्तिर्बहुप्राणा हिन्दी कस्मै न रोचते ॥३८॥

प्रियसर्गा प्रियग्रामा प्रियश्रमा प्रियव्रता ।
प्रियदेशा प्रियप्राणा हिन्दी कस्मै न रोचते ॥३९॥

प्रियसेवा प्रियावेगा प्रियसत्या प्रियंवदा ।
प्रियभक्ता प्रियोत्कर्षा हिन्दी कस्मै न रोचते ॥४०॥

प्रियविश्वा प्रियक्षोणी प्रियजिह्वा प्रियातिथिः ।
प्रियदेवा प्रियाद्वैता हिन्दी कस्मै न रोचते ॥४१॥

हिन्दुमुस्लिमवाणी सा मसीहीबन्धुसेविता ।
न भेदं वेत्ति नो हिन्दी निम्नोच्चताविधायकम् ॥४२॥

जायसीतुलसीभाषा कबीरसूरसेविता ।
रैदासनानकादीनां हिन्दी केन निवार्यते ॥४३॥

संस्कृतं प्राकृतं सर्वं चापभ्रंशं पुरातनम् ।
भाषास्सर्वास्स्वदेशस्य हिन्दी रक्षति रक्षिता ॥४४॥

गणतन्त्रा प्रजातन्त्रा सर्वधर्मसमन्वया ।
भाषा हिन्दीसमा कास्ति भेदाभेदतरङ्गिणी ॥४५॥

उर्दू-हिन्दी-विभेदेषु लिप्यन्तरो विशेषतः ।
नागर्यां लिखिता योर्दू हिन्दी शुद्धाति सा मता ॥४६॥

कर्तृकर्मक्रियाभेदो भेदश्च सर्वनामसु ।
दृश्यते न तयोः कश्चिद्वचसापि न जन्मना ॥४७॥

उर्दू-शैली ह्यलङ्कारो हिन्दीभाषासुमेखला ।
मध्ये विराजमाना सा सौन्दर्यसुषमावहा ॥४८॥

संत्यज्य मध्यमं मार्गं यदागच्छति दूरतः ।
अहिन्दीपदविन्यासैरुर्दू सा फारसीनिभा ॥४९॥

वादने लेखने चैका सरला नागरी लिपिः ।
ध्वनिर्विज्ञानसंसिद्धा लिपिर्विज्ञानसत्तमा ॥५०॥

सर्वत्र भारते ज्ञाता संस्कृतेन सहैव सा ।
संस्कृतं देववाणीव नागरी देवनागरी ॥५१॥

इच्छेच्चेद्भारतं राष्ट्रं सर्वभाषासमन्वयम् ।
नागरी तर्हि कर्त्तव्या सर्वभाषासमा लिपिः ॥५२॥

भाषा वर्णश्च वृत्तान्तो राष्ट्रियता च संस्कृतिः ।
भारत्यां शोभनं यद्यत्सर्वं रक्षति नागरी ॥५३॥

साहित्यं राष्ट्रभाषायै न तथा रोचते यथा ।
विज्ञानमर्थशास्त्रञ्च विधिशास्त्रञ्च दर्शनम् ॥५४॥

एतादृशेषु शास्त्रेषु प्रगतिर्या प्रजायते ।
राष्ट्रभाषाविकासः सा विज्ञायते मनीषिभिः ॥५५॥

सर्वं राष्ट्रं प्रतनोति सर्वशास्त्रं स्वभाषया ।
करोति राज्यकार्यञ्च तथैव स्वप्रशासने ॥५६॥

सर्वंशास्त्रमधीते यद्राष्ट्रं विदेशभाषया ।
करोति राज्यकार्यं तद् हीनं विदेशभाषया ॥५७॥

उत्तिष्ठति च जागर्त्ति प्राप्नोति नूतनं वरम् ।
निबोधति च शास्त्राणि राष्ट्रं सम्यक्स्वभाषया ॥५८॥

संग्राह्यो विश्वकोशोऽत्र नूतनादपि नूतनः ।
सर्वंशास्त्रेषुसद्ग्रन्थो देशभक्तमनीषिभिः ॥५९॥

विश्वविद्यालयेनूनं शिक्षा देया स्वभाषया ।
देशीशिक्षां विना पुष्टां राष्ट्रं गच्छति दुर्गतिम् ॥६०॥

शिक्षां भाषां च संचिन्त्य नीती राष्ट्रविधायकैः ।
मातृभूमिकृते कार्या न च स्वार्थाय केवलम् ॥६१॥

शिक्षा गुणार्जनं शिक्षा नीतिर्धर्मश्च संस्कृतिः ।
शिक्षा मता च गायत्री लोके द्विजत्वकारिणी ॥६२॥

लोकज्ञानं सदाचारो व्यवसायश्च दर्शनम् ।
विज्ञानं च कलाः सर्वाः प्रवर्धन्ते हि शिक्षया ॥६३॥

प्रदीपः सर्वशास्त्राणां विद्यानां सर्वजीवनम् ।
शिक्षाशास्त्रं मतं मूलं विचाराचारयोः सदा ॥६४॥

राजनीतिवशा शिक्षा सैव शिक्षावशाथवा ।
इति मतद्वये श्रेष्ठं चरमं हि प्रकीर्तितम् ॥६५॥

राज्याधीना यदा शिक्षा याति शिक्षा क्षतिं तदा ।
शिक्षाधीनं यदा राज्यं जाता राज्योन्नतिस्तदा ६६॥

राज्यशिक्षाविवादोऽयं राजन्यविप्रयोर्यथा ।
ब्रह्मक्षत्रं हि राष्ट्रं वै मतं सम्यग्मनीषिभिः ॥६७॥

तस्मात्तयोर्यदि द्वन्द्वो राष्ट्रं तदा विनश्यति ।
तयोरैक्यं यदा प्राप्तं राष्ट्रं याति तदोन्नतिम् ॥६८॥

राजाधीनं यथा राज्यं शिक्षा गुरुवशा तथा ।
गुर्वधीनो भवेद्राजा न गुरू राजसेवकः ॥६९॥

राष्ट्रियतां समुद्दिश्य मनुष्यतां विकाशयेत् ।
मनुष्यतां समुद्दिश्य विज्ञानं च विकाशयेत् ॥७०॥

संस्कृतं राष्ट्रभाषासीत् समस्तभारते पुरा ।
अद्यापि सा जनैः कैश्चिद्राष्ट्रभाषा विमृश्यते ॥७१॥

न पेशलं मतं तेषां वक्तृबोधव्यकालतः ।
संस्कृतं कूपमुत्गाढं हिन्दी च प्रवहज्जलम् ॥७२॥

संस्कृतं गुरुभाषा नो हिन्दी मातृ-भारती ।
पूर्यपूरकभावोऽयं नो राष्ट्रोत्थानकारकः ॥७३॥

संत्यज्य संस्कृतं हिन्दी राष्ट्रभाषा न सक्षमा ।
हिन्दीं विस्मृत्य संस्कृतं नैव वर्धितुमर्हति ॥७४॥

प्रमेयनिर्भरा हिन्दी प्रमाता संस्कृतं मतम् ।
संप्राप्तसंस्कृत-निधि हिन्दी केनापमीयते ॥७५॥

भावे शब्दे लिपौ हिन्दी संस्कृतान्न प्रभिद्यते ।
सभ्यजनैः प्रयुक्ता सा हिन्दी सम्प्रति संस्कृतम् ॥७६॥

प्रवृद्धमातरं हिन्दी गृहे संप्राप्य संस्कृतम् ।
अपभ्रंशस्य कन्यापि न भ्रष्टा न च निर्धना ॥७७॥

संस्कृते चिन्तनं गूढं भारतस्यातिमौलिकम् ।
तदुत्थानं सदा कार्यमर्वाचीनविचारकैः ॥७८॥

शैल्यां संस्कृतशक्तिर्या संदृश्यते मुहुर्मुहुः ।
तनोति सद्विचारं सा शैली वैज्ञानिकी मता ॥७९॥

बहुरूपा च तच्छैली बहुग्रन्थेषु दृश्यते ।
श्लोकशैलींसमा शैली नेह सत्प्रतिपत्तये ॥८०॥

तस्यामेव निबद्धानि रामायणञ्च भारतम् ।
धर्मशास्त्रपुराणञ्च नानाशास्त्रगवेषणा ॥८१॥

तस्यामेव निबद्धं च तत्त्वज्ञानं सयुक्तिकम् ।
सर्वशास्त्रं च विद्वद्भिस्तत्तच्छास्त्रविशारदैः ॥८२॥

संस्कृतस्य यथा श्लोको हिन्दीदोहा तथा मता ।
उभयोरेव सादृश्यं दृष्टं ज्ञानविवर्धने ॥८३॥

दोहाशैलीं समाश्रित्य कबीरतुलसीसमैः ।
हिन्दीभाषाकविश्रेष्ठैः कृता नव्यविचारणा ॥८४॥

इत्थं सूक्ष्मविचारेषु सूक्ष्मशैली प्रशंसिता ।
तस्यां यो वाक्यविन्यासः स भाष्योत्कर्षकारकः ॥८५॥

संस्कृतस्य विकासाय प्रकृष्टचिन्तनाय वा ।
नव्यप्राच्यमतैक्यार्थं श्लोकलेख्या विचारणा ॥८६॥

श्लोकशैलीप्रयोगेण चिन्तनं वर्द्धितं सदा ।
संक्षिप्तापि समुद्गूढा राष्ट्रशैली प्रकीर्तिता ॥८७॥

संस्कृतस्य महास्थानं भारत्यामथ भारते।
हिन्दीसंस्कृतसंयोगो विज्ञानोत्कर्षकारकः ॥८८॥

इति श्रीसङ्गमाचार्यैर्देशशक्तिचतुष्टये ।
परिच्छेदः प्रणीतोऽयं भाषाभिधश्चतुर्थकः ॥८९॥

५

पञ्चमो देश्यपरिच्छेदः

बहुधर्मो बहुप्रज्ञो बहुजातिर्बहुप्रजः ।
अतिप्राचीनदेशोऽयं देश्यस्तस्यातिभाग्यवान् ॥१॥

धर्मे जातौ च सत्प्रेम तस्य दृष्टं युगे युगे ।
धर्माय जातये चैव तस्य जीवनयापनम् ॥२॥

स्वत्वं नास्ति महर्घं वै धर्मजातिगुणान्विना ।
धर्मजातिगुणैर्युक्तं स्वत्वं भवति सार्थकम् ॥३॥

स्वार्थं समधिगच्छति धर्मजाती विहाय यः ।
न स देशे समादृतो बहुज्ञो धनिकोऽपि वा ॥४॥

धर्मेण जायते जातिर्जात्या वाधर्मसम्भवः ।
कतरो धर्मजात्योश्च राष्ट्रतत्त्वनियामकः ॥५॥

जात्यैव धर्मसम्भवो न च धर्मेण जातयः ।
दृश्यते भुवि यो धर्मस्स जात्युत्कर्षकारकः ॥६॥

जातिर्द्रव्यं गुणो धर्मो गुणोत्पत्तिश्च द्रव्यतः ।
जायते द्रव्यसामान्यं समानगुणकारणैः ॥७॥

यान्त्यैकजातिभावं च समधर्मावलम्बिनः ।
धर्मजा जातिरित्यन्ये जाती राष्ट्रनियामिका ॥८॥

न धर्मो न च वै जाती राष्ट्रतत्त्वनियामिका ।
इत्याहुर्व्यक्तिवादेषु रता नीतिविशारदाः ॥९॥

राष्ट्रिक एव राष्ट्रं ते मन्यन्ते बहुयुक्तितः ।
तस्येतिहासभूगोलौ राष्ट्रतत्त्वनियामकौ ॥१०॥

न राष्ट्रिकस्य कल्याणं तथा च जातिधर्मयोः ।
आहारे च निवासे च शिक्षाजीविकयोर्यथा ॥११॥

न च तस्य हितं किञ्चिद् राष्ट्रहितात्प्रभिद्यते ।
राष्ट्रभक्तिर्मतो धर्मो राष्ट्रिकैश्च सनातनः ॥१२॥

ये नानाजातिसम्भवा नानाधर्मावलम्बिनः ।
राष्ट्रप्रेमरता जाता तेऽपि राष्ट्रिकसत्तमाः ॥१३॥

राष्ट्रद्रोहसमं पापं नास्ति किञ्चित्कदाचन ।
तद्विहीनः सदाचारः स धर्मः कथ्यते बुधैः ॥१४॥

भिनत्ति धर्ममाश्रित्य देशान् जनांश्च यो नरः ।
न स मूढो विजानाति धर्मं देशञ्च मानवम् ॥१५॥

नारी स्वातन्त्र्यमाप्नोति यदा सर्वासु जातिषु ।
जातिधर्मास्तदा सर्वे विनश्यन्तीति सङ्गमः ॥१६॥

पारतन्त्र्यं हि नारीणां भिनत्ति हिन्दुमुस्लिमान् ।
स्वातन्त्र्यमथ नारीणां श्लेोति हिन्दुमुस्लिमान् ॥१७॥

नारी पुत्री प्रिया भार्या माता पूज्यतमा तथा ।
एवमेव विजानन्ति सर्वे धर्मप्रवर्तकाः ॥१८॥

नराणां दृष्टयस्ताश्च नारीणां न तु लक्षणम् ।
नरदृष्टिषु नारीणां पारतन्त्र्यं हि लक्षणम् ॥१९॥

नारी प्राणी तथैवास्ति यथा नरः सनातनः ।
न तनया न भार्या वै न माता सा विशेषतः ॥२०॥

अर्वाचीनमते सत्यं नरनारीसमानता ।
शरीरभिन्नता नास्ति स्त्रीपारतन्त्र्यकारणम् ॥२१॥

पुरुषस्थापिता धर्मा भिन्नाः सन्ति परस्परम् ।
धर्मा नारीप्रणीताश्चाभिन्नाः सन्ति परस्परम् ॥२२॥

अर्वाचीनसमाजस्य नेत्री नारी प्रकीर्तिता ।
मनुष्यतां समाश्रित्य तस्याः समाजनिर्मितिः ॥२३॥

लोकवादे महत्त्वं वै तस्या एव विशेषतः ।
गृहकार्यकलापेषु तथा राज्यानुशासने ॥२४॥

परित्यज्य स्वदेशं यस्समागच्छति भारतम् ।
शरणान्वेषणाशीलं तमाश्लिष्यति भारतम् ॥२५॥

पारसीकाः पुरा याता भारते शरणार्थिनः ।
भारताङ्गीकृता जाताः सर्वे राष्ट्रिकसत्तमाः ॥२६॥

भोटदेशे यदापत्तिरागता राष्ट्रनाशिनी ।
भोटीयैर्भारते प्राप्ता तदेष्टशरणागतिः ॥२७॥

धन्यं नो भारतं वर्षं शरणदं सुखाकरम् ।
नान्यत्र दृश्यते तस्य शरणदानशीलता ॥२८॥

स्वातन्त्र्यमतिथीनां तत् सम्यग्रक्षति भारतम् ।
आहारे च विहारे च धर्मविवाहयोरपि ॥२९॥

आयाता भारते ये ये नानाजातिसमुद्भवाः ।
रक्षन्ति कुलधर्मांस्ते जातिधर्मांश्च रूढितः ॥३०॥

आहारे च विवाहे च भेदस्तस्मादजायत ।
चातुर्वर्ण्यव्यवस्थानात्पुनर्भेदस्स वर्धितः ॥३१॥

नानाजातिसमुत्पादे हेतुर्वर्णव्यवस्थितिः ।
चातुर्वर्ण्यसमुत्पादे हेतुर्वानेकजातयः ॥३२॥

चातुर्वर्ण्यं हि देशस्य मतं समाजलक्षणम् ।
संस्काराश्च मनुष्याणां तस्मिन् सुरक्षिता ध्रुवम् ॥३३॥

मनुष्यमात्रधर्मं तद्विदुर्महामनीषिणः ।
आद्यं मानववादं तद्धर्मी वदन्ति केचन ॥३४॥

जीवमात्रस्वभावं वा पौराणिकाश्च तद्विदुः ।
वस्तुमात्रस्वभावं वा प्रोचुः पुनश्च केचन ॥३५॥

चातुर्वर्ण्येन सम्पुष्टौ देशो धर्मश्च शाश्वतः ।
चातुर्वर्ण्यमयो देशः पुराणेषु प्रकीर्तितः ॥३६॥

चातुर्वर्ण्यं मतं युक्तं व्यवहारे मनीषिभिः ।
तत्संन्यासो मतो युक्त ऋषिभिः परमार्थतः ॥३७॥

एषणा यदि विद्यन्ते चातुर्वर्ण्यं ध्रुवंमतम् ।
नैषणा यदि विद्यन्तेऽचातुर्वर्ण्यं ध्रुवं मतम् ॥३८॥

एतद्विद्यात्समासेन चातुर्वर्ण्यबलाबलम् ।
तन्निभं जनसम्पृष्टं नास्ति समाजदर्शनम् ॥३९॥

अशुद्धमथ शुद्धं च चातुर्वर्ण्यं द्विधा मतम् ।
अशुद्धं सर्वथा त्याज्यं स्पृश्यास्पृश्यत्वलक्षणम् ॥४०॥

चातुर्वर्ण्यं च यच्छुद्धं न तत्रास्पृश्यतालवः ।
चातुर्वर्ण्यसमाजोऽयं साङ्गोपाङ्गमहेश्वरः ॥४१॥

चातुर्वर्ण्येन पूज्यत्वं न निश्चितं कदाचन ।
वृत्तेन हि भवत्यार्यं इति प्रोक्तं मनीषिभिः ॥४२॥

चातुर्वर्ण्येन लोकोऽयं कुलाचारस्वधर्मयोः ।
प्रतिष्ठितश्शमं याति व्यावहारिकजीवने ॥४३॥

जातिवादाच्च भिद्ये तच्चातुर्वर्ण्यं मनीषिभिः ।
जन्मना जायते जातिः कर्मणा वर्ण उच्यते ॥४४॥

उच्यते कर्मणोत्कर्षस्सर्वैर्मनीषिभिस्सदा ।
उत्कर्षेण च लक्ष्यते लोकेऽस्मिन् श्रेष्ठवर्णता ॥४५॥

संप्राप्ता बहुभिश्शूद्रैः कर्मणा श्रेष्ठवर्णता ।
मातङ्ग-व्याध-रैदासमहाभागैर्यथा पुरा ॥४६॥

आचारः परमोधर्मः प्रार्थनाग्योऽतिरिच्यते ।
आचारेण विहीनस्याराधनाप्रार्थने वृथा ॥४७॥

तनु र्वचो मनः कर्म शुद्धंयस्य स पावनः ।
शुच्यर्थोपार्जनाच्छ्रेयो न किञ्चित्पावनं मतम् ॥४८॥

स्वार्थाय लोकयात्रायां भ्रष्टाचारं करोति यः ।
मनो वंशं च राष्ट्रं च प्रणिहन्ति स निश्चितम् ॥४९॥

आदानेषु प्रदानेषु यत्रोत्कोचस्य पद्धतिः ।
यथा जग्धघुणं काष्ठं नष्टं तच्छासनं तथा ॥५०॥

यदा भवति सर्वत्र चौरव्यापारवर्धनम् ।
तदा भवन्ति प्रायेण जनाः परोपजीविनः ॥५१॥

शासनं तत्र संनष्टं राष्ट्रिकाश्चातिशोषिताः ।
नेतारो यत्र भ्रष्टा हि कथं तत्र सुशासनम् ॥५२॥

सुशासनं विना राष्ट्राद् भ्रष्टाचारो न यास्यति ।
विना नेतृसदाचारं न जायते सुशासनम् ॥५३॥

योऽर्थाय यतते नेता विनार्हतां विना श्रमम् ।
भ्रष्टाचारोऽथ चौरो वा स शोषको महान् मतः ॥५४॥

जनता शोषिता यत्र दारिद्र्यं तत्र दृश्यते ।
दारिद्र्यं शोषणस्यास्ति परिणामो निरागतः ॥५५॥

क्षणमेकं न तिष्ठति देहः परिश्रमं विना ।
ततो मतं मनीषिभिश्श्रमेण जीविकार्जनम् ॥५६॥

विशालं भारतं यावत्तावत् तस्य दरिद्रता ।
प्राचीनं भारतं यावत्तावत् तस्य दरिद्रता ॥५७॥

धनधान्यमयो देशो भारतं यदि निर्धनम् ।
वृत्तानि राष्ट्रिकाणां तद् सन्ति दारिद्र्यहेतवः ॥५८॥

न जातं शासनं तस्य सर्वकल्याणकारकम् ।
दुःखमेव ततो ज्ञातं प्रारब्धमनिवार्यतः ॥५९॥

भाग्यायत्तं न दारिद्रयं न चाढ्यत्वं कदाचन ।
आढ्यत्वं च दरिद्रत्वं लोकशासनसम्भवे ॥६०॥

अधनो जायते सर्वो म्रियते च तथा पुनः ।
धनमुत्पाद्य लोके च सर्वमत्रैव मुञ्चति ॥६१॥

जन्मना सदृशास्सर्वे नाढ्या नैव च निर्धनाः ।
अर्थवैषम्यकृल्लोके राज्यमेव हि केवलम् ॥६२॥

लोकस्य शासनं कार्यं दारिद्र्यनाशहेतवे ।
वारम्वारं विधेयं च राज्यस्य परिवर्तनम् ॥६३॥

आविष्करोति वैषम्यं या मुद्रा राज्यसन्ततिः ।
उत्पत्तिवण्टने तस्या भवेतां कूपवत्सुखम् ॥६४॥

तृषार्त्तो गच्छति कूपं यथा तृषानिवृत्तये ।
क्षुधार्त्तो यतते तथा मुद्रायै खाद्यलब्धये ॥६५॥

सञ्जायते श्रमेणैव सदा मुद्रार्जनं सुखम् ।
न शोषणेन राज्येन न व्याजेन च भिक्षया ॥६६॥

व्यापारे यश्च लाभांशः स राष्ट्रस्य निधिर्मतः ।
भूमिस्तत्र सम्पत्तिस्सर्वं राष्ट्रस्य शेवधिः ॥६७॥

राष्ट्रिकास्सेवकास्सर्वे राष्ट्रं स्वामीति कथ्यते ।
सेव्यसेवकसम्बन्धस्तयोश्चार्थपरायणः ॥६८॥

नान्यस्सेव्योऽर्थदाता वा राष्ट्रादृते महीतले ।
सम्पत्तिषु च राष्ट्रस्य स्वाधिकारो न कस्यचित् ॥६९॥

अर्थेषु राष्ट्रिको दासो राष्ट्राधीनो हि वर्तते ।
राष्ट्रं च राष्ट्रिकाधीनं विचाराचारयोर्मतम् ॥७०॥

स्वातन्त्र्यलक्षणं साम्यं राष्ट्रिकैरेवमाप्यते ।
रामराज्यं च यत्प्रोक्तं तदेवंविधशासनम् ॥७१॥

देश्या यत्र समद्रव्या न श्रेष्ठिनो न निर्धनाः ।
तद्राष्ट्रं सुखसम्पन्नं मतं सर्वैर्मनीषिभिः ॥७२॥

स्वातन्त्र्यमर्थसाम्यं च सर्वदेश्यगुणावुभौ ।
अन्त्यं राष्ट्रेण कर्त्तव्यं कार्यमाद्यं च राष्ट्रिकैः ॥७३॥

स्वाधिकारो मनुष्येभ्यो ग्राह्य उद्योगसम्पदाम् ।
स्वतन्त्रेण च राष्ट्रेण सर्वकल्याणहेतवे ॥७४॥

राष्ट्रायत्तौ च कर्त्तव्यौ पण्यानां क्रयविक्रयौ ।
भूस्वामित्वं समं देयं देश्येभ्यः कृषिकर्मणे ॥७५॥

समानं वित्तवण्टनं राष्ट्रस्योन्नतिकारकम् ।
विषमार्थिकवण्टनं, राष्ट्रदुर्गतिकारकम् ॥७६॥

यज्ञादिभिः पुराकृतास्समवित्ताः प्रियप्रजाः ।
अर्थसाम्यं कराधानै र्विधीयते च साम्प्रतम् ॥७७॥

जलं जलाशयानां हि गृह्णाति सविता यथा ।
धनिकानां धनं नित्यं तथाददाति राजकम् ॥७८॥

पूषा वनस्पतिभ्यश्च संगृह्णाति रसं यथा ।
समस्तराष्ट्रिकेभ्यो वै संघराज्यं करं तथा ॥७९॥

संघराज्यकराधानं भानुवृत्तिरिवोचितम् ।
प्रदानादानयोर्तस्य प्रथमं ह्यधिकं मतम् ॥८०॥

द्रव्यवर्षाप्रसारणं कृषिवाणिज्यचक्रकम् ।
वृष्टिर्भवति यादृशी तादृशी राष्ट्रसम्पदा ॥८१॥

अतिवृष्टिरनावृष्टि रुभे दुःखप्रदे मते ।
द्रव्यवर्षा ततः कार्या संघराज्येन मध्यमा ॥८२॥

कदाचिदविशुध्येन्न सङ्घराज्यधनागमः ।
बलं वित्तं हि राज्यस्य शक्तिसमृद्धिकारणम् ॥८३॥

न यज्ञं न च दानं यः करोति राष्ट्रिकाधमः ।
गूहते करदानाच्च स्वार्थाय द्रव्यसंग्रहम् ॥८४॥

असाधुरेवमन्तव्यस्स दण्डनीयराष्ट्रिकः ।
नियोज्या तस्य सम्पत्ती राष्ट्रहिताय शासने ॥८५॥

योऽसाधुभ्योऽर्थमादाय साधुभ्यः संप्रयच्छति ।
स कृत्वा प्लवमात्मानं सन्तारयति तावुभौ ॥८६॥

मनुरप्यब्रवीदेवं राष्ट्रकल्याणकारकः ।
अस्ति राष्ट्रस्य राष्ट्रत्वमर्थसाम्येऽतिरक्षिते ॥८७॥

अर्थो ह्येकं मतं मूलमुभयो र्जातिधर्मयोः ।
साम्ये च तत्र संजाते प्रगतिर्जातिधर्मयोः ॥८८॥

अर्थचिन्ता विनश्यत्यभिरुचिं जातिधर्मयोः ।
जनयत्यर्थमुक्तिश्च विवेकं जातिधर्मयोः ॥८९॥

प्रकृत्यैव पुरा प्राप्तं भारतीयैः स्वभोजनम् ।
अर्थचिन्तामकुर्वद्भिर्लब्धो ज्ञानशिखामणिः ॥९०॥

विज्ञानसभ्यतायोगात्सम्प्राप्यार्थसमानता ।
ननं भवति तत्प्राप्तौ प्रगतिर्जातिधर्मयोः ॥९१॥

राष्ट्रिकाणां चरित्रं यत्तद्राष्ट्रचरितं मतम् ।
तस्मिन्नेव च संवाहो गुणानां जातिधर्मयोः ॥९२॥

न सा जातिः समीचीना लक्षिता या न राष्ट्रिके ।
न स धर्मः समीचीनो लक्षितो यो न राष्ट्रिके ॥९३॥

भारतसन्ततेश्शीलं लोके सर्वत्र विश्रुतम् ।
दाता ज्ञानी सुहृद्योगी लोके कोऽपि न तत्समः ॥ ४॥

धीरो वीरो शरण्योऽथ सत्यसन्धः सदाव्रतः ।
आतिथेयो दयावांश्च भक्तस्तपी न तन्निभः ॥९५॥

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवाः ॥९६॥

इत्युवाच मनुश्शुभ्रं चरित्रस्य निदर्शनम् ।
प्लेटोमतं चरित्रं तत्प्रशासकमनीषिणाम् ॥९७॥

प्रवृत्तिश्च निवृत्तिश्च सम्मिश्रिते परस्परम् ।
प्रवृत्तिर्जन्मना लभ्या निवृत्तिस्तु प्रयत्नजा ॥९८॥

निवृत्तिमार्गमुत्सृज्य प्रवृत्तिं वेत्ति यो नरः ।
वर्धमानप्रकामेन सुखं प्राप्नोति नैव सः ॥९९॥

प्रवृत्तिसंयमाज्जातं सुखं निवृत्तिजं मतम् ।
काण्टमहामतेर्नीतिर्यादृशी भारतेऽपि सा ॥१००॥

निवृत्तेर्जन्म वर्धनं रूपं फलं च यादृशम् ।
भारतीयैःपुराज्ञातं प्रवृत्तेश्च न तादृशम् ॥१०१॥

निवृत्तिमार्गपण्डितैस्तैः प्रवृत्तिरुपेक्षिता ।
ततो विज्ञानशोधनं पुरा जातं न भारते ॥१०२॥

प्रवृत्तिं च निवृत्तिं च भारतंवेत्ति साम्प्रतम् ।
विज्ञानेषु च नैपुण्यं सर्वलोकभयङ्करम् ॥१०३॥

प्रवृत्तिः संप्रयोगाच्च निवृत्तिर्जायते यदा ।
भारतीयस्य सद्वृत्तं लोके प्रकाश्यते तदा ॥१०४॥

साकं निवृत्तिना किंवा प्रवृत्तिर्यदि युज्यते ।
प्लेटोमतं मनुप्रोक्तं काण्टमतं हि सिद्ध्यति ॥१०५॥

दुर्लभं यादृशं वृत्तं यत्रैव निमग्ना जनाः ।
सुलभं यादृशं वृत्तं यत्रैव पर्वता जनाः ॥१०६॥

भारते सुलभं वृत्तं गिरीशो यत्र देवता ।
नगरेभ्यश्च ग्रामेभ्यो हिमाद्रिं यान्ति राष्ट्रिकाः ॥१०७॥

अद्यापि भारतीयो हि सच्चरित्रे प्रमाणकम् ।
ऊर्ध्वगतिश्च दिव्यात्मा श्रेष्ठः केन न पूज्यते ॥१०८॥

चरित्रं भारतीयानां बहुधैव प्रदर्शितम् ।
वाल्मीकिव्यासबुद्धैश्च कालिदासादिभिस्तथा ॥१०९॥

आत्मनः प्रतिकूलानि नाचरन्ति परैः सह ।
आत्मवत्सर्वभूतेषु दृष्टिस्तेषां च सर्वदा ॥११०॥

भारतीयास्सदाचारा विदेशीयैः प्रवञ्चिताः ।
लुण्ठिताः पीडितास्तप्ताः सर्वेसदाततायिभिः ॥१११॥

सभ्यतामन्दिरं तेषां बर्बरैर्ध्वस्तदूषितम् ।
लोकाद् बर्बरताहिंसे भारतीयैर्न्न चूर्णिते ॥११२॥

सभ्यबर्बरयोर्द्वन्द्वो भारतेऽतीवभीषणः ।
शान्तिप्रियाः प्रजाः सर्वाः शोषिताश्च प्रताडिताः ॥२१३॥

अहिंसाशिक्षको देशो हिंस्रराष्ट्रैर्हतो वृथा ।
हिंसायुगे वचस्तस्य लोके क्वापि न विश्रुतम् ॥११४॥

प्राप्तेऽहिंसायुगे लोके को विस्मरतीह तद्वचः ।
अहिंसैव च हिंसायाः सिद्धा काले वरीयसी ॥११५॥

बर्बरतामयी हिंसा यदा लोके भविष्यति ।
अण्वस्त्रसम्प्रयोगेण सर्वं तदा विनश्यति ॥११६॥

बर्बरता हतोदितः सभ्यतायाश्च भास्करः ।
हिंसातमो विनश्यति वर्धते विश्वबन्धुता ११७॥

दृष्ट्वा गान्धिमहात्मना हिंसादेवीविडम्बनाम् ।
अहिंसैव मता सम्यक् सर्वोदयाय संसृतेः ॥११॥

स्वचरित्रं प्रदर्शितं भारतीयमनीषिणः ।
अद्याप्यनुक्रियतेऽसौ महात्मा लोकदुर्लभः ॥११९॥

भारतीयंचरित्रं चेल्लोके सर्वत्र कल्प्यते ।
हिंसायाः प्राप्यते नाशः सयुद्धमायुधेन च ॥१२०॥

नश्यति हिंसया हिंसा रत्नं रत्नेन छिद्यते ।
मायया हीयते माया कण्टकं कण्टकेन च ॥१२१॥

हिंसाशक्तेः पराकाष्ठा संजायते यदा यदा ।
तस्या उल्केव नाशोऽपि संदृश्यते तदा तदा ॥१२२॥

झंझावाते गते यथा वर्षा भवति माधवी ।
हिंसाचक्रे गते तथाऽहिंसा भवति शाश्वती ॥१२३॥

झंझावाते समायाते वर्षा संभवति क्वचित् ।
हिंसाचक्रे समायातेऽहिंसा प्रभवति क्वचित् ॥१२४॥

अहिंसाशास्त्रमन्तव्यं कर्त्तव्यं सर्वमानवैः ।
संवर्धेत यथाऽहिंसा विधेयं सर्वदा तथा ॥१२५॥

हिंसालक्ष्यमहिंसैवाहिंसायास्तु पुनश्च सा ।
अहिंसैव सदा साध्या लोके सर्वत्र मानवैः १२६॥

राष्ट्रप्रेमानुसारेण सदाचारैर्मनीषिभिः ।
राष्ट्रिकस्त्रिविधः प्रोक्त, उत्तमो मध्यमोऽधमः ॥१२७॥

उत्तमो राष्ट्रिकः किञ्चित् स्वराष्ट्रं न हि याचते ।
स्वप्रेमप्रतिकारेण पदं धनं च वेतनम् ॥१२८॥

नासौ गृह्णाति राष्ट्राद्धि तस्मै दत्तो च केवलम् ।
सर्वसाधारणस्येव तस्य जीवनपद्धतिः ॥१२९॥

मध्यमो राष्ट्रिको राष्ट्रात्प्राप्नोति पदवेतने ।
यथापदं तथा कर्म तस्य जीवनयापनम् ॥१३०॥

नासावुत्पादयत्यर्थं व्ययं करोति केवलम् ।
प्रशासकः प्रजामध्ये मार्जारेष्विव वानरः ॥१३१॥

न राष्ट्रप्रेम निःस्वार्थं मन्यते तस्य केनचित् ।
राष्ट्रसेवां विधत्ते सः सुखस्वार्थाय केवलम् ॥१३२॥

लोकयात्राहितार्थाय स्वार्थसिद्धिर्यदा कृता ।
राष्ट्रप्रेम तदा जातं कर्त्तव्यभावनाश्रितम् ॥१३३॥

अधिकं योऽश्नुते नासौ राष्ट्रभक्तः प्रकीर्तितः ।
यस्य व्ययेषु नो सीमा राष्ट्राय तस्य न जीवनम् ॥१३४॥

लोकयात्राव्यये सीमा धनागमे च सर्वथा ।
सर्वसाधारणस्यैव शासकस्यापि भूषणम् ॥१३५॥

अधमो राष्ट्रिको राष्ट्रं नैव वेत्ति कदाचन ।
स्वयं च स्वकुलं चैव बिभर्ति यत्नतः सदा ॥१३६॥

उत्तमा राष्ट्रिकास्सन्ति राष्ट्रभक्ता असंशयम् ।
उदरंभरयस्त्वन्ये केवलं क्षुद्रजन्तवः ॥१३७॥

इतिश्रीसङ्गमाचार्यैर्देशशक्तिचतुष्टये ।
परिच्छेदः प्रणीतोऽयं पञ्चमो देश्यसंज्ञकः ॥१३८॥

६

षष्ठो देशिकपरिच्छेदः

बहुधैव गुरोस्तत्त्वं प्रतिज्ञातं मनीषिभिः ।
ईश्वरो वेश्वराच्छ्रेयान् देशिको वा गुरुर्मतः ॥१॥

निषेकादीनि कर्माणि यः करोति यथाविधि ।
संभावयति चान्येन स विप्रो गुरुरुच्यते ॥२॥

इति ब्रूते मनुः सम्यक् स्वस्मृतौ गुरुलक्षणम् ।
संभिन्नश्च गुरोस्तेन ह्याचार्योऽध्यापकोऽथवा ॥३॥

देशिक एव सम्मान्यो देशभक्तैर्गुरुः सदा ।
नेश्वरो नेश्वराच्छ्रेयान् न विप्रो न पुरोहितः ॥४॥

यो देशीदेश्यदेशेषु प्रीतिं तनोति शाश्वतीम् ।
देश्येषु चाग्रणी मान्यः स देशिको मतो बुधैः ॥५॥

शासकैरपि पूज्योऽसौ न तस्य शासने रुचिः ।
तथापि शासनं तस्य देशनामनुवर्तते ॥६॥

देशिकैर्निर्मितो देशो देशी देशिकसंस्कृता ।
देशिकैश्शिक्षितो देश्यो देशिको ज्ञानसन्ततिः ॥७॥

सर्वपरम्परामूलं देशिकानां परम्परा ।
पितृपरम्परायाः सा गरीयसी परम्परा ॥८॥

शिष्यपरम्परा सैव देशिकानां परम्परा ।
पुत्रपरम्परा नैव तां तुलयितुमर्हति ॥९॥

यादृशा देशिकास्सन्ति देशो भवति तादृशः ।
देशो वा देशवासी वा देशिकशरणागतः ॥१०॥

संस्कृतिं देशधर्मं वा देशिकोऽप्यनुवर्तते ।
सर्वैषणाः परित्यज्य देशार्थाय स जीवति ॥११॥

न कुले न धने देहे न पदे न च संग्रहे ।
भवत्यभिरुचिस्तस्य न च मानापमानयोः ॥१२॥

विद्यागुरुर्वयोगुरू राजनीतिगुरुस्तथा ।
धर्मगुरुश्च चत्वारः प्रोक्ता गुरवो बुधैः ॥१३॥

हितं सुखं च नेयस्य भवतो न गुरुं विना ।
तस्माद्गुरुकृपा प्रोक्ता सर्वकार्यप्रसाधिका ॥१४॥

देशी देशोऽथदेश्यः सर्वो जीवति देशिके ।
देशिके पतिते जाते सर्वः क्षिप्रं विनश्यति ॥१५॥

शास्ता देशिकस्त्यागी तत्त्वज्ञानी विवेकवान् ।
भविष्यति यदा राष्ट्रे रामराज्यं ध्रुवं तदा ॥१६॥

प्लेटोमहाशयः सुष्ठु वदत्येवं जनेश्वरम् ।
तादृशश्शासको भूमौ क्वापि हन्त न दृश्यते ॥१७॥

तदभावे प्रजातन्त्रं सर्वश्रेयस्करं मतम् ।
यस्मिन् बहुमतं पक्षे देशे तस्यैव शासनम् ॥१८॥

नैकतन्त्रं मतं युक्तं हितान्वितं मनीषिभिः ।
तस्मिन् भ्रष्टे समायाते भ्रष्टं राष्ट्रं प्रजायते ॥१९॥

राजा सेनापतिः किं वा सेवको वा गणाधिपः ।
आधिपत्यं यदेकस्य तत्सर्वशक्तिघातकम् ॥२०॥

राजनीतिदलाः कल्प्याः प्रजातन्त्रप्रशासने ।
देश्यदेशिकसम्मान्या नीतिसिद्धान्तसंयुताः ॥२१॥

ज्ञातुं वहुमतं कार्यं मतदानं प्रजाजनैः ।
राजनीतिदलैः सर्वैः कार्यो यत्नो जये सदा ॥२२॥

विजयी यो दलो जातस्तस्यैवोचितशासनम् ।
विजितो यो दलोजातो विरोधपक्षभागसौ ॥२३॥

उभयदलसम्बन्धो न शत्रुमित्रवन्मतः ।
चणकस्येव पक्षौ द्वौ शासनस्य मतौ दलौ ॥२४॥

मतदाने कृतं येन जयाय भ्रष्टसाधनम् ।
स जघन्यो दलः कर्त्तुं शासनं नैव सक्षमः ॥२५॥

यत्र नास्ति मतदाने राष्ट्रिकाणां स्वतन्त्रता ।
निर्लोभं निर्भयं यत्र मतदानं च तद्वृथा ॥२६॥

सत्तारूढदलग्राह्यं को वेत्ति दुष्टसाधनम् ।
मतदानस्यकालेऽतो न वरं दलशासनम् ॥२७॥

जननावञ्चको याति जयं लब्ध्वापि दुर्गतिम् ।
सफलो धूर्तनेता यः सर्वदैवैस्स निन्द्यते ॥२८॥

मतदाने जयो लब्धस्स्वीकृतश्चेन्न केनचित् ।
न्यायालये विवादः स समाधेयो विधानतः ॥२९॥

मतदानविवादेषु यो न्यायालयनिर्णयः ।
निरीक्षणं पुनस्तस्य न वरं साधुभिर्मतम् ॥३०॥

न्यायालयप्रबन्धे च नोचितं दलशासनम् ।
न्यायाधीशो दलासक्तो निहन्ति न्यायसारणीम् ॥३१॥

धनं चौरवणिग्भ्युश्च बलात्कारि प्रताडनम् ।
आदाय मतदाने यो जयते स दलोऽधमः ॥३२॥

बलात्कारेण साफल्यं तस्योक्तं राष्ट्रनाशकम् ।
वर्धन्ते शासने तस्य चौर्यमुत्कोचताडने ॥३३॥

भ्रष्टाचारः प्रजातन्त्रे ततो हि जायते महान् ।
गुण्डजना विवर्धन्ते खलशोषकतस्कराः ॥३४॥

प्रजातन्त्रव्यवस्थाया मतमेतद्धि दूषणम् ।
एकाधिपतिराज्यं वै ततश्चैव प्रजायते ॥३५॥

पक्षपातबलात्कारावत्याचारप्रशोषणे ।
दुष्कर्माणि प्रवर्धन्ते राजतन्त्रप्रशासने ॥३६॥

न यत्र दलमर्यादा न च कर्तव्यभावना ।
सेवाव्रतं न लोकाय जघन्यं दलशासनम् ॥३७॥

दृष्ट्वा दूषणमेतच्च जयप्रकाशसुव्रती ।
राष्ट्रप्रशासनायाह दलशून्यप्रशासनम् ॥३८॥

ग्रामराज्ये सदैवस्याद्दलशून्यप्रशासनम् ।
पौरराज्येऽपि तच्छ्रेष्ठं सर्वकल्याणकारकम् ॥३९॥

प्रान्तराज्ये कथं श्रेष्ठं तच्चेति गूढचिन्तनम् ।
लोककल्याणमाश्रित्य कर्त्तव्यं सर्वचिन्तकैः ॥४०॥

संघराज्यं च तच्छ्रेष्ठं यत्प्रान्तराज्यनिर्मितम् ।
तस्मिन् दलाधिपत्यं चेद्ध्रुवा हि राष्ट्रदुर्गतिः ॥४१॥

प्रान्तराज्यं मतं सर्वैः प्रजातन्त्रस्य मूलकम् ।
यदि तत्र प्रजातन्त्रं दलराज्यं ध्रुवंमतम् ॥४२॥

दलराज्यं क्वचिद्युक्तं राज्यं निर्दलमन्यतः ।
इति विचार्य कर्तव्या मर्यादा दलशासने ॥४३॥

दलशासनमर्यादां निहन्ति यो दलाधिपः ।
स्वार्थी वा मदमत्तो वा संशयात्मा विनश्यति ॥४४॥

दलप्रशासनं कार्यं दलनीतिविधानतः ।
न तत्र व्यक्तिवादस्स्याद्व्यक्तिपूजापरायणः ॥४५॥

कूटनीतिर्दलैः सार्धं नैवोचिता कदाचन ।
दलनिष्ठा सदस्यानां तथा विशीर्यते ध्रुवम् ॥४६॥

वर्ज्या हिंसा दलाचारे लोकतन्त्रविचारकैः ।
स्यादवैधो दलो राष्ट्रे हिंसा यत्र प्रयुज्यते ॥४७॥

अहिंसैव मता प्राणा लोकतन्त्रस्य पद्धतेः ।
न सा यदि दलाचारे न स जीवितुमर्हति ॥४८॥

राजनीतिकसम्बन्धो विदेशेषु कृतो यदि ।
बहिष्कार्यो दलो देशात् स्वराष्ट्रहितसाधकैः ॥४९॥

भारते मुस्लिमा ये ते भारतीया विलक्षणाः ।
हिन्दीसंज्ञका विश्वे देशे तुरुष्कसंज्ञकाः ॥५०॥

तेषां च भारती भाषा लिपिश्चाभारती मता ।
जन्मना कर्मणा देशे वैदेशिकाश्च धर्मतः ॥५१॥

दर्शनं ग्रीकदेशस्य तैर्धर्मेण समन्वितम् ।
समन्वितं न धर्मेण तैर्भारतीयदर्शनम् ॥५२॥

तेषां समन्वयो नष्टो विज्ञानेन च साम्प्रतम् ।
अवैज्ञानिकधर्मो यो न स जीवितुमर्हति ॥५३॥

विना योगं विना तर्कं देशीपरम्परां विना ।
मोहैकमूलको धर्मो न प्रशस्तो मनीषिभिः ॥५४॥

तथापि मुस्लिमो धर्मो भारतेऽतिसुरक्षितः ।
उपासनापथस्तस्य नानापथे समागतः ॥५५॥

ऋते चोपासनायाः किंमूल्यं धर्मस्य शाश्वतम् ।
समाजराज्यविज्ञानैः किं न धर्मस्तिरस्कृतः ॥५६॥

अहिंसा परमो धर्म इति यो न मन्यते ।
किं तेन धर्मभावेन गुरुधर्मेण वा पुनः ॥५७॥

धर्मराज्यं न वै राज्यं राज्यधर्मश्च नोचितः ।
राज्ये सन्ति महाधर्मास्सागरे जन्तवो यथा ॥५८॥

राज्यप्रशासनंयुक्तं मतात्परं च मौलिकम ।
मतेन नीयमानं यत् तद्राज्यमधमं मतम् ॥५७॥

प्रकृष्टराज्यपद्धत्या जातो धर्मसमन्वयः ।
धर्मसमन्वयाज्जाता लोकसंग्रहविस्तृतिः ॥६०॥

नासौ धर्मः प्रशस्तो वै येन च्युतस्समन्वयः ।
धर्मस्समीक्ष्यते धर्मैर्मनुजो मनुजैर्यथा ॥६१॥

कवीराकबरादिभिः कृतो धर्मसमन्वयः ।
सन्तः कुर्वन्ति सर्वत्र सर्वधर्मसमन्वयम् ॥६२॥

प्रशस्ता भुवि ते सर्वे मनुष्यहितकारकाः ।
सद्गुरवश्च पूज्यन्ते भारते तु विशेषतः ॥६३॥

तेषां परम्परा रक्ष्या सततं जीवितैरपि ।
साधुपरम्परा लोके साक्षाद्धर्मश्शरीरवान् ॥६४॥

जन्मना मुस्लिमास्सन्तो बहवस्सन्ति भारते ।
तेषां धर्मश्च विख्यातस्सूफीमताभिधानतः ॥६५॥

हिन्दवो मुस्लिमाः किं वा सन्तो लोकविभूषणाः ।
धिक्कुरुते वचस्तेषां हिन्दुमुस्लिमभिन्नताम् ॥६६॥

क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठति यो नरः ।
हिन्दुर्वा मुस्लिमः किं वा यो न द्वेष्टि स धार्मिकः ॥६७॥

जघन्या मुस्लिमास्सन्ति यैः कृतं भारताहितम् ।
प्रशस्ता मुस्लिमास्सन्ति यैर्भारतहितं कृतम् ॥६८॥

सज्जना दुर्जना भिन्ना भवन्ति सर्वजातिषु ।
मुस्लिमेषु तथा सन्ति भिन्नास्सज्जनदुर्जनाः ॥६९॥

येऽत्राततायिनो जाता बर्बरकृत्यकारणैः ।
तेषां मुस्लिमधर्मो वै नेति ज्ञेयं च मुस्लिमैः ॥७०॥

हिन्दुमुस्लिमभेदश्च गुरुभेदो विशेषतः ।
गुरुरेको ययोरेव न तौ हिन्दुश्च मुस्लिमः ॥७१॥

ग्रन्थभेदो वदन्त्यन्ये हिन्दुमुस्लिममार्गयोः ।
गन्तव्यैक्यं तयोराहुः कबीरादिमनीषिणः ॥७२॥

मन्तव्यैक्यं तयोराह प्राणनाथो महमतिः ।
जात्यैक्यं च तयोराहुरितिहासविशारदाः ॥७३॥

सन्मूलप्रातिभज्ञाने दाराशिकोहदर्शने ।
हिन्दुमुस्लिमधर्मौ तौ सङ्गमं चाभिगच्छतः ॥७४॥

रसखानादिकवयः सूफिनो जायसीसमाः ।
हिन्दीलेखकमुस्लिमा मता राष्ट्रिकसत्तमाः ॥७५॥

हिन्दुमुस्लिमसंङ्गमस्तैर्बहुधा विवर्धितः ।
सज्जनास्तत्र ये स्नातास्तैर्लब्धं राष्ट्रबीजकम् ॥७६॥

शोपितस्सङ्गमोऽधुना स दिव्यो ज्ञानवर्धकः ।
हिन्दुमुस्लिमनिम्नगाऽ प्रवहन्ति ततः पृथक् ॥७७॥

मुस्लिमैर्मोहग्रस्तैश्चयदा त्यक्तः स सङ्गमः ।
पाकिस्तानं तदा जातं भारते देहकण्टकम् ॥७८॥

मुस्लिमैर्वङ्गदेशीयैर्यदा प्राप्ता स्वतन्त्रता ।
पाकिस्तानं तदा छिन्नं बंगलादेशगौरवात् ॥७९॥

जायते मोहभङ्गो वै शीघ्रं वा विलम्बितम् ।
वैमनस्ये न जीवन्ति देशा धर्माश्च मानवाः ॥८०॥

सौमनस्यं हि जीवाणु राष्ट्रस्यापि नृणामिव ।
पाकभारतपार्थक्यं ततो न शाश्वतं मतम् ॥८१॥

अभेदो भेदमूलो वै प्रयास्यति मुहुर्मुहुः ।
भविष्यति यथापूर्वं पाकभारतसङ्गमः ॥८२॥

अस्ति किं नाम पार्थक्यं गङ्गासिन्धुप्रदेशयोः ।
कथं तक्षशिला भिन्ना काशीपाटलिपुत्रयोः ॥८३॥

सरोवरं न जानाति कः सिन्धुब्रह्मपुत्रयोः ।
नदीमुखं न जानाति कः सिन्धुब्रह्मपुत्रयोः ॥८४॥

उद्भवे मेलनं दिव्यं तयो र्मानसरोवरे ।
विलये मेलनं शुभ्रं तयोश्चहिन्दसागरे ॥८५॥

आसमुद्रसमुद्राद्यो स्थितः पश्चिमपूर्वयोः ।
हिमाद्रिविन्ध्ययोर्मध्ये कस्तंभेदितुमर्हति ॥८६॥

देवलं सिन्धुदेशं कः पञ्चाम्बुकं च नीरजम् ।
विद्याकेन्द्रं च कश्मीरं भारताच्छेत्तुमर्हति ॥८७॥

यवन-शक-पह्लवास्तस्मिन् प्रान्ते पुरा हृताः ।
अरबीभापिवर्बराः काले तत्र पराजिताः ॥८८॥

धन्या सिन्धुभूमौ यत्र जाता भारतसभ्यता ।
संस्कृतं पाणिनेश्चापि भारतैक्यविधायकम् ॥८९॥

देववाणी श्रुता विज्ञैस्तत्र भारतभारती ।
प्रदेशः पश्चिमोत्तरो भारते गौरवस्थली ॥९०॥

महायानं समुद्भूतं तत्रैव बौद्धशासने ।
कालान्तरे समुत्पन्नाश्शैवशाक्ताश्चवैष्णवाः ॥ १॥

महांस्तत्र पुरा जातो विवादश्शैवबौद्धयोः ।
क्वचित्क्वचिच्च संघर्षो बौद्धवैष्णवयोरपि ॥९२॥

हिन्दुमुस्लिमसंघर्षो यो जातस्तत्र साम्प्रतम् ।
पूर्वसंघर्षवन्नूनं स शान्तिमधिगच्छति ॥९३॥

यथाविधि स्वचारित्रं रक्षेच्चेत्कोऽपि धार्मिकः ।
न देशं भारतादृते स श्रेष्ठं प्राप्तुमर्हति ॥९४॥

विहाय यादृशं देशं योऽन्यं पश्यति धार्मिकः ।
न भारते न धर्मे च विश्वासस्तस्य विद्यते ॥९५॥

प्रच्छन्नराजनीतिज्ञस्सोऽस्ति पाषण्डधार्मिकः ।
राजनीतिं च धर्मं च विनाशयति तावुभौ ॥९६॥

राजनीतिदलाद्यदा धर्मभेदोऽभिजायते ।
नासौ दलो वरो मतो राजनीतिविशारदैः ॥९७॥

न धर्मो न च जातिर्वै दलनिर्माणहेतवः ।
राजनीतिव्यवस्थैव दलनिर्माणकारणम् ॥९८॥

भिन्ना हि सा व्यवस्थास्ति धर्मसंघाद्विशेषतः ।
एकैव शोभते शुभ्रा सर्वधर्मावलम्बिनाम् ॥९९॥

राजनीतिरुचिः पशुर्मतो नरः सनातनः ।
एषा रुचिः पुरा कृता धर्माधीना विधानतः ॥१००॥

राजनीतिपरो धर्मः क्रियते नव्यधार्मिकैः ।
राजनीतिरुचेर्जाले बद्धो धर्मस्ततोदृढम् ॥१०१॥

राजनीतिदलो लक्ष्यं संकीर्णं मनुते यदा ।
धर्मैश्च जातिभिस्सार्धं दलः संगच्छते तदा ॥१०२॥

राजनीतिव्यवस्थासु लक्ष्यसंकीर्णता वृथा ।
नो सुखं तत्र जीवानां प्रजानां तत्र नो हितम् ॥१०३॥

दलस्वतन्त्रता रक्ष्या प्रभावाज्जातिधर्मयोः ।
जातिधर्मौ परित्यज्य स्थितो यः स दलो वरः ॥१०४॥

राजनीतिं समुद्दिश्य साम्यवाददलो वरः ।
वर्गसंघर्षमाश्रित्य हिंसां परन्तु शिक्षते ॥१०५॥

हिंसा च वर्गसंघर्षस्तस्माद्यदि बहिष्कृतौ ।
निर्देशनं विदेशाच्च तस्मिन्यदि न विद्यते ॥१०६॥

राजनीतिदलानां वै स भवति वरस्तदा ।
अहिंसाशान्तिशिक्षको राष्ट्रभक्तिसमन्वितः ॥१०७॥

साम्यवादेन सार्धं चेत् संगच्छते स्वतन्त्रता ।
दलः समाजवादस्य ततो भुवि प्रजायते ॥१०८॥

दलः समाजवादस्य सर्वश्रेष्ठो मतो बुधैः ।
न दलस्तत्समश्चास्ति राजनीतिसुधारकः ॥१०९॥

अर्थमाश्रित्य राज्यं च वाणिज्यं च सनातनम् ।
दण्डविधिं च शिक्षां च श्रेष्ठास्तस्यैव नीतयः ॥११०॥

समाजवादवीथिं वै यदा प्राप्स्यति भारतम् ।
दारिद्र्यं सर्वसंघर्षास्तदा नंक्ष्यन्ति मूलतः ॥१११॥

राष्ट्रवादो न पर्याप्त इति समाजवादिनः ।
समाजवादनीतिश्च हीना राष्ट्रहितं विना ॥११२॥

मीयन्ते राष्ट्रवादेन समाजवादनीतयः ।
समाजवादमाश्रित्य राष्ट्रवादः परीक्ष्यते ॥११३॥

कार्यस्तयोस्समन्वयो राजनीतिविचारकैः ।
भेत्तव्यश्चैकतन्त्रतो यथावसरवादतः ॥११४॥

नीतिं विहाय यो नेता शास्ति दलं नरेशवत् ।
अवश्यं स परित्याज्यो जनतन्त्रविनाशकः ॥११५॥

न चरित्रं दले यस्मिन्न प्रजातन्त्रपद्धतिः ।
न च कार्यक्रमः सुष्ठु स भ्रष्टः शक्तिलोलुपः ॥११६॥

देशोत्थानं विराजते दले नेतरि चाधुना ।
संयतौ दलनेतारौ यत्र देशस्समुन्नतः ॥११७॥

उभौ भ्रष्टौ गतौ यत्र तत्र देशः पतिष्यति ।
उभयोरपि नेतव्यं देशिकानां प्रशासनम् ॥११८॥

साध्यते देशिकैरेव देशप्रगतिशीलता ।
भ्रष्टा दलाश्च नेतारो नश्यन्ते तैर्महात्मभिः ॥११९॥

जातो नेता प्रशासकस्स्वार्थी च शक्तिलोलुपः ।
न भ्रष्टः कोऽपि तत्समो देशे स्वतन्त्रतामनु ॥१२०॥

गुरवश्च तिरस्कृतास्तेन सर्वत्र भारते ।
सर्वोपरि विराजते स वेदनेव शेखरे ॥१२१॥

न नेता देशिको मतो बुद्धशङ्करनानकैः ।
देशिकोपरि नेता चेत्तदा देशो विनश्यति ॥१२२॥

नेता स्वसीम्नि नेतव्यो भारते सर्वदेशिकैः ।
तस्य प्रताडनालीला नाशयद्भिः प्रयत्नतः ॥१२३॥

मनुते न यदा नेता स्वदेशिकानुशासनम् ।
सर्वैर्दलसदस्यैः स बहिष्कार्यो दलात्तदा ॥१२४॥

अस्ति दले यदा तस्याधिकारो बहुदारुणः ।
भयङ्करदलस्त्याज्यस्सर्वैर्देशसुधारकैः ॥१२५॥

मर्यादाहीननेतारं न दण्डयति यो दलः ।
त्याज्योऽसौ कर्मचारिभ्यो देशभक्तैश्च सर्वशः ॥१२६॥

दले नेतरि मर्यादा सच्चरित्रसमुद्भवा ।
यदा तौ देशिकाधीनौ तदा चरित्रजाह्नवी ॥१२७॥

न ग्राह्यं देशिकस्थानं नेत्राथवा दलेन वा ।
देशिकेनापि न ग्राह्यं राज्यपदं कदाचन ॥१२८॥

गुरुराज्ञोऽभिसम्बन्धो ग्रन्थेषु बहुवर्णितः ।
निश्चितं तेन राष्ट्रत्वं सम्बन्धेन मनीषिभिः ॥१२९॥

सम्बन्धो गुरुराज्ञोश्च वशिष्ठराघवेन्द्रवत् ।
रामदासशिवाजीवच्चाणक्यमौर्यराजवत् ॥१३०॥

देशिकस्य सदाचारः शास्तुश्च पूर्णवैधता ।
वैधनैतिकयोस्साम्यमभीष्टं च मनीषिभिः ॥१३१॥

अनुयाति विधिर्लोके सदाचारं प्रतिष्ठितम् ।
अनुसृत्य विधिं चैव सदाचारो न गच्छति ॥१३२॥

व्यवहारनियामको विधिस्संसत्सु तन्यते ।
किं वा न्यायालयेषु स न्यायाधीशैर्विचार्यते ॥१३३॥

सुखं बहुमनुष्याणां प्रोक्तं विधिप्रयोजनम् ।
मर्दनं दुर्जनानां च सज्जनानां च पालनम् ॥१३४॥

सदाचारो मतो नीतिर्मनुष्यो नीयते यया ।
आत्मवत्सर्वभूतेषु यः पश्यति स नीतिमान् ॥१३५॥

आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।
इति मत्वा सदाचारं कुरुते नीतिमानिह ॥१३६॥

नीतेर्नियमसत्यता सर्वंकषा विचारिता ।
न नीतेर्नियमःकृतस्संसता भूभृताथवा ॥१३७॥

प्रकृतेर्नियमो यथा नीतेरपि मतस्तथा ।
सर्वमानवकार्येषु सर्वैस्तद्वच्च नीयते ॥१३८॥

हितं बहुमनुष्याणां प्रोक्तं तस्य प्रयोजनम् ।
सुधारो दुर्जनानां च सज्जनानां च वर्धनम् ॥१३९॥

यो नीतिनियमं वेत्ति देशिकः स प्रकीर्तितः ।
यथाज्ञानं तथाचारस्तस्यैव हि विशेषता ॥१४०॥

देशिका बहवस्सन्ति नानाविज्ञानपण्डिताः ।
मुनिवर्येषु तेष्वेव यस्त्यागवान् स सत्तमः ॥१४१॥

त्यागेनैव लभ्यते सर्वं मोक्षपदं च गौरवम् ।
यद्यच्छ्रेयस्करं लोके तत्तत् त्यागस्य संपदा ॥१४२॥

स्यान्नास्तिकास्तिकानां वै त्यागेनैव समन्वयः ।
इति सुरेश्वरः प्राह दर्शनानां समन्वयम् ॥१४३॥

न भेदस्त्यागसत्ययोरितिप्रोक्तं च गान्धिना ।
लोके सत्यं प्रतिष्ठितं सर्वंकषो महेश्वरः ॥१४४॥

त्यागेऽसत्त्वेऽपि महार्घं भोगे सत्त्वेऽपि नार्हता ।
महार्घसत्ययोरैक्यं मनीषिणां हि निश्चयः ॥१४५॥

आस्तिकनास्तिकानां स्यात् सत्येनैव समन्वयः ।
इत्येव गान्धिना प्रोक्तो दर्शनानां समन्वयः ॥१४६॥

सत्यं जिज्ञासुभिर्नित्यं त्यागस्संदृश्यते बुधैः ।
तस्य भावे हितं सर्वमहिंसा वा समग्रता ॥१४७॥

त्यागतुल्यं न कल्याणं त्यागतुल्या न सत्यता ।
त्यागतुल्या न चाहिंसा त्यागतुल्या न पूर्णता ॥१४८॥

विना त्यागं न कल्याणं विना त्यागं न सत्यता ।
विना त्यागं न चाहिंसा विना त्यागं न पूर्णता ॥१४९॥

त्यागोऽस्तिसर्ववृत्तीनां त्यागोऽस्ति सर्वकर्मसु ।
त्यागोऽस्ति सर्वभावानां त्यागोऽस्ति सर्वचेतसि ॥१५०॥

शुभवृत्तिस्त्यागजा मता सत्कर्मत्यागजं मतम् ।
सद्भावस्त्यागजो मतस्सच्चेतस्त्यागजं मतम् ॥१५१॥

त्यागवादं समाश्रित्य देशना सर्वदेशिकैः ।
श्रुत्वा बुद्ध्वा च तां शीले यश्चिनोति स शिक्षितः ॥१५२॥

इति श्रीसङ्गमाचार्यैर्देशशक्तिचतुष्टये ।
परिच्छेदः प्रणीतोऽयं षष्ठो देशिकसंज्ञकः ॥१५३॥

७

सप्तमो लोकपरिच्छेदः

व्याघातं सर्वभावानां स्वरूपमाह हेगलः ।
निराकर्त्तुं समीकर्त्तुं प्रत्ययस्तं च भासते ॥१॥

भावाभावविभावेभ्यः प्रत्यय एक एव हि ।
दृश्यदृगात्मरूपेषु स्वद्वन्द्वतो विराजते ॥२॥

एकप्रत्ययवादेन द्वन्द्वन्यायेन च त्रिधा ।
संसिद्धं सच्चितोरैक्यं तेन च परमात्मता ॥३॥

मार्क्सेन तद् विपर्यस्तं किन्तु हेगलदर्शनम् ।
प्रकृतिः स्थापिता तेन प्रत्ययश्च निराकृतः ॥४॥

द्वन्द्वन्यायं गृहीत्वाप्यध्यात्मवादस्तिरस्कृतः ।
समाजान्तरनिर्माणे प्रयुक्ता द्वन्द्वपद्धतिः ॥५॥

बाधाद् विवर्तते लोक इति मार्क्सविनिश्चयः ।
षडवस्थाश्च लोकस्य सिद्धास्तेन यथाक्रमः ॥६॥

अलक्ष्यश्चास्फुटो बाधः साम्यवादे पुरातने ।
तस्मादासीत्तदा लोके सम्पत्तिबोधशून्यता ॥७॥

प्रादुर्भूता च संघर्षात्सम्पत्तिग्रहभावना ।
संजाता दासता ततः समाजे वर्गकारिणी ॥८॥

दासा जाताः प्रजा द्वन्द्वात् स्वामिनश्च नरेश्वराः ।
राजतन्त्रं ततो जातं यत्र कृषेः प्रधानता ॥९॥

विज्ञानेन कृतो भूमेर्यन्दोद्योगो महत्तरः ।
पूञ्जीवादस्तदा जात एकाधिकारपोषकः ॥१०॥

अर्थविषमता जाता ततश्चानर्थकारिणी ।
'दारिद्र्यशोषणे व्याप्ते क्षुधामृत्युश्च सम्भवः ॥११॥

कृतो राज्येन तस्माच्च सर्वसम्पत्तिसंग्रहः ।
जातः समाजवादोऽतः सर्वशोषितरक्षकः ॥१२॥

वर्गभेदमपाकृत्य समाजस्तेन निर्मितः ।
न सन्ति यत्र दारिद्र्यं रोगोऽज्ञानं च शोषणम् ॥१३॥

समाजवादमाश्रित्य साम्यवादः प्रतिष्ठते ।
तृप्यति यत्र सर्वेषां वस्तूपभोगवासना ॥१४॥

राज्यनाशोऽवशं तत्र साम्यवादे भविष्यति ।
जनता प्राप्स्यते मुक्तिं राज्याच्छोषणमूलकात् ॥१५॥

किन्तु हिंसाप्रयोगेण साम्यवादोऽपि दूषितः ।
न कृता तेन निर्द्वन्द्वा संघर्षशक्तिकल्पना ॥१६॥

राज्यं नाशोन्मुखं नैव सर्वशक्तिपरिग्रहात् ।
हिंसा तस्य च विस्तीर्णा जनाश्च शक्तिवञ्चिताः ॥१७॥

यथा दैत्यस्तथा राज्यं जातं शक्तिमदान्वितम् ।
दण्डशक्तिप्रयोगे किं ततः परं भयानकम् ॥१८॥

दण्डशक्तिविनाशाय हिंसाशक्तिखण्डनम् ।
राज्यं कल्याणकृत्कर्त्तुर्महिंसाशक्तिवर्धनम् ॥१९॥

अहिंसाशास्त्रनिर्माणं कृतं गान्धिमहात्मना ।
तेनैव च कृतं सम्यङ्मार्क्सवादविदूषणम् ॥२०॥

नाहिंसा विद्यते मार्क्से मूलं या गान्धिनो मते ।
उभयोरपि दृष्टोऽन्तरस्त्वनयोस्तत्त्वदर्शिभिः ॥२१॥

साधनमूल्यमीमांसां न विदुर्मार्क्सवादिनः ।
साध्यसाधनयोश्शुद्धिं विदुश्च गान्धिवादिनः ॥२२॥

साधनशुद्धिभावाच्च परम्पराऽविरोधतः ।
अहिंसाऽध्यात्मभावाभ्यां मार्क्साद् गान्धी विशिष्यते॥२३॥

गान्धिमार्क्सनयौ लोके निःश्रेयसकरावुभौ ॥
तयोस्तु त्यागमूलत्वान्मार्क्साद् गान्धी विशिष्यते ॥२४॥

प्रवृत्तिं च निवृत्तिं च न विदुर्मार्क्सवादिनः ।
न शौचं न सदाचारं न सत्यं न च दैवतम् ॥२५॥

"असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ॥२६॥

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः" ॥२७॥

इति कृष्णेन विज्ञानं गीतायां वर्णितं पुरा ।
मार्क्सप्रभृतिवादानां तस्मिंश्च पूर्णखण्डनम् ॥२८॥

विनाऽन्यायविरोधेन विना सत्याग्रहेण च ।
विना स्वतन्त्रतां वाण्या विना च भारतीयताम् ॥२९॥

विना कुटीरकोद्योगं विना सर्वोदयं मतम् ।
विना च सर्वधर्मैक्यं गान्धिवादो न सम्भवः ॥३०॥

इत्याह लोहियोपाह्वो राममनोहरः सुधीः ।
कुर्वाणो गान्धिवादस्य प्रयोगं साम्यवर्धकम् ॥३१॥

न सहन्ते मतं तस्य प्रच्छन्नगान्धिवादिनः ।
गान्धिमहात्मनश्शिष्या मठाधीशाश्च शासकाः ॥३२॥

न च साम्यं मते तेषां सत्याग्रहो न शाश्वतः ।
न च साधनशुद्धिर्हि न ग्रामोत्थानयोजना ॥३३॥

तस्माच्च लोहियाभिन्ना गान्धिवादस्य सत्यता ।
आचारे च विचारे च रक्ष्या सर्वसमीक्षकैः ॥३४॥

यादृशो गान्धिवादो नः साम्प्रतं राष्ट्रदर्शनम् ।
देशो जागरितस्तेन विहितश्चात्मनिर्भरः ॥३५॥

इति ज्ञेयं च रक्ष्यं च गान्धिमतं प्रयत्नतः ।
दूषयन्ति यतो ह्यद्य तं छद्ममार्क्सवादिनः ॥३६॥

राज्यशक्तिर्महाशक्तिर्लोकेच्छाशक्तिजा मता ।
प्राणा इव शरीरे सा देशदेहे विराजते ॥३७॥

प्राणान्विना यथा देहो देशो राज्यं विना तथा ।
आत्मशक्तिं विना कोऽपि न किञ्चित्कर्तुमर्हति ॥३८॥

लोकशक्तिः पराशक्तिर्लोकसंग्रहजा मता ।
आर्थिकी राज्यशक्तिश्च लोकशक्तिश्च धार्मिकी ॥३९॥

यो हि निश्चितसम्बन्धो धर्मार्थपुरुषार्थयोः ।
स लोकराज्यसम्बन्धो मन्तव्यो राज्यचिन्तकैः ॥४०॥

लोकसंग्रहजा शक्तिर्मतदाने प्रजायते ।
नानादलसदस्येषु द्वन्द्वं यत्र प्रतिष्ठितम् ॥४१॥

व्यवस्था मतदानस्य राज्ये विधीयते यदा ।
आयोगेन स्वतन्त्रेण वरं निर्वाचनं तदा ॥४२॥

शास्ता दलो यदाप्नोति प्रतिपक्षात्पराजयम् ।
प्रजातन्त्रं तदा सत्यं प्ररूढलोकमानसम् ॥४३॥

यस्य पक्षे मताधिक्यं स क्षेत्रनायको मतः ।
यस्तं नयति सन्मार्गे स लोकनायको मतः ॥४४॥

देशशक्तिप्रतीकोऽसौ पुरुषो लोकनायकः ।
देशरक्षैकसङ्कल्पो जायते हि युगे युगे ॥४५॥

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
आत्मलोकावुभौ वेत्ति स महात्मा सुदुर्लभः ॥४६॥

न मतं तत्समं राज्यं पुनरन्यस्य का कथा ।
स लोकपालको ज्ञानी राज्यं च लोकशोपकम् ॥४७॥

राज्यं वा पुरुषः किंवा कतरो लोकमूलकः ।
इत्यत्र चरमं युक्तं राज्यं हि पुरुषार्थकम् ॥४८॥

पुरुषस्य न च स्थानं कोऽपि ग्रहीतुमर्हति ।
न च किञ्चिन्मतं लोके यतो हि पुरुषात्परम् ॥४९॥

मानववादमाश्रित्य योज्याः सर्वविचारणाः ।
तस्मिन्नेव हि कर्त्तव्यः सर्वदर्शनसंग्रहः ॥५०॥

इति श्रीसङ्गमाचार्यैर्देशशक्तिचतुष्टये ।
परिच्छेदः प्रणीतोऽयं सप्तमो लोकसंज्ञकः ॥५१॥

नामानुक्रमणिका

शुद्धिपत्रम्

पृष्ठम्	पंक्तिः	अशुद्धपाठः	शुद्धपाठः
२	४	सत्ववःचित्	सत् क्वचित्
१६	१३	हि दी	हिन्दी
१६	१८	एषा भावना राष्ट्रस्य	राष्ट्रस्य भावना ह्येषा
२०	३	प्रतनोति	तनोतीह
२३	५	महर्घं	महार्घं
२६	२२	लक्ष्यते ।	लक्ष्यते
३२	२	नगरेम्यश्च	नगरेभ्यश्च
३२	११	सश्यता	सभ्यता
३२	२१	सश्यता	सभ्यता
३६	१०	काये	कार्यं
३६	।२३	प्रजातन्त्र्य	प्रजातन्त्र
३८	४	वै	वै
४१	१३	संङ्गमः	सङ्गमः
४१	१६	निम्नगाऽ	निम्नगाः
४७	१०	तथाचस्	तथाचारस्
४८	६	सत मं	सत्कर्मं